अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

षड्विंशे वर्षे प्रथमोऽङ्कः

१५ जनवरी, २००४ ई०

९९

रजतजयन्ती-वर्षाङ्कः

प्रधानसम्पादकः

डॉ० रमाकान्तशुक्लः

एम०ए०, पीएच०डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

उपसम्पादकः

अभिनवः शुक्लः

एम०ए०, एम०फिल् (संस्कृते)

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

विषयसूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	डा० रमाकान्त शुक्लः	१
२. नववर्षशुभकामना	डा० गोपालकृष्ण दाशः	२
३. नववर्षशुभकामना	श्री परमानन्द झा	२
४. देवभाषा	डा० शिवशरण शर्मा द्विवेदी	३
५. राष्ट्रियसंहतिः संस्कृतं च	श्री श्री० सुन्दरराजः	४-१०
६. निर्वासनं कृतम्	प्रो० हरिदत्त शर्मा	११-१२
७. याति वनं सीता	प्रो० श्रीनिवास रथः	१३
८. चेतना विलीयते	प्रो० श्रीनिवास रथः	१४
९. जयति भारतम्	प्रो० श्रीनिवास रथः	१५-१६
१०. किं कुर्यात्	डा० रमाकान्त शुक्लः	१७
११. यानावरोधी दुस्त्यजः	डा० रमाकान्त शुक्लः	१८
१२. वैभवाप्ति-साधनम्	डा० शिवशरण शर्मा द्विवेदी	१९
१३. देववाणी-परिषद्वार्ता	अभिनवः शुक्लः	२०-२३
१४. संस्कृतजगद्वार्ता	अभिनवः शुक्लः	२४
१५. श्रीमद्रामचरितमानसम्	पं० प्रेमनारायण द्विवेदी	२५-४०
१६. अर्वाचीनसंस्कृतस्य २५ वर्षाणि	डा० चन्द्रमौलि शुक्लः	४१-११८
१७. संस्कृतजगद्वार्ता	अभिनवः शुक्लः	११९-१२०
१८. चित्राणि		

अर्वाचीनसंस्कृतम्
(R. N. 34554/79)
अर्वाचीनसंस्कृतम् (पंजी. सं. ३४५५४/७९)

१. प्रकाशनस्थानम्-नयी दिल्ली ।
२. प्रकाशनकालावधिः-त्रैमासिकम् ।
३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९
४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

१५-१-२००४ ई०

-रमाकान्तशुक्लः
(प्रकाशकः, सम्पादकः)

सम्पादकीयम्

अर्वाचीनसंस्कृतस्यायं तृतीयो रजतजयन्तीवर्षाङ्कः। पुटबन्ध (जिल्द)-संख्याक्रमेणायं नवति (९०) तमः पुटबन्धः। अंकगणनायाञ्चायं नवनवति (९९) तमोऽङ्कः।अत्र काश्चन प्रत्यग्राः काश्चन चैकवर्षपूर्वं प्राप्ता रचनाः प्रकाश्यन्ते। एतासु रचनासु करुणा, हास्यव्यङ्ग्यं, देशभक्तिः लोकदर्शनं च साक्षात्कर्तुं शक्यन्ते। भारतस्य राजधान्यां कारयानानामतिवृद्ध्या प्रत्यहं यानावरोधस्य शकटावरोधस्य (ट्रैफिकजामस्य) वा दर्शनं भवति। मार्गाः न्यूना यानानि च अधिकाधिकानि।

अस्मादङ्कात् पं० प्रेमनारायणद्विवेदिभिः प्रणीतः श्रीरामचरितमानसस्य संस्कृतपद्यानुवादः क्रमशः प्रकाशयिष्यते। १६ पृष्ठेषु अयमनुवादोऽस्मिन्नङ्के प्रकाशितः। द्विवेदिमहाभागकृतेनानेनानुवादेन नानापुराणनिगमागमसम्मतस्य गोस्वामितुलसीदासकृतस्य रघुनाथगाथाभाषानिबन्धस्य संस्कृतेऽप्येकत्र स्थितिरवलोक्या स्यात्।

'अर्वाचीनसंस्कृतस्य २५ वर्षाणी'ति सन्दर्भलेखे डा० चन्द्रमौलि शुक्लोऽर्वाचीनसंस्कृते १५.१.२००४ यावत्प्रकाशितानां लेखानां रचनानाञ्च कालक्रमानुगतां सूचीं प्रस्तौति या शोधार्थिनां कृते उपयोगिनी भवेत्।

देववाणी-परिषदोऽष्टाविंशे स्थापनादिवससमारोहे १३.१२.२००३ तारिकायाम् **'अर्वाचीनसंस्कृतस्य पञ्चविंशतिवर्षाणी'**ति विषयमालम्ब्यैका परिचर्चा राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः प्रो० वेम्पटिकुटुम्बशास्त्रिमहाभागस्याध्यक्ष्ये आयोजितासीत् यत्र वक्तृषु अर्वाचीनसंस्कृतस्य प्रवेशाङ्कस्य त्रयो लेखकाः—डॉ० रामसुरेश पाण्डेयः, डॉ० शशिप्रभा कुमार, डॉ० शशी तिवारी चाप्युपस्थिता आसन्। तत्सम्बद्धं सचित्रं वृत्तं देववाणी-परिषद्वार्तायां प्रकाश्यते। संस्कृत-जगद्वार्तासु १६.१०.२००३ तः १५.१.२००४ यावदायोजितानां संस्कृतकार्यक्रमाणां सूचना दीयते।

इतोऽग्रे पत्रे प्रकाशनार्थं चक्रिकायां (C.D.) मुद्रिता सामग्री एव प्रायः स्वीकार्या स्यात्। सा च **'चाणक्य'**नाम्नि आकारे (फाण्टे) मुद्रिता

स्यात्। छायाप्रतिलिपिः (कार्बन-कॉपिका) प्रकाशिता नो भवेत्। केषाञ्चन लेखकमहानुभावानां हस्तलिपिः अर्थगौरववती सत्यपि अक्षरयोजकैः प्रूफपाठकैः सम्पादकेनापि च दुर्बोध्या भवति। नवीनेनानेनोपायेन काठिन्यमिदं जेतु सुशक्यं भवेत्। पुनश्च अर्वाचीनसंस्कृतरचनानां विषये लेखाः प्रेषणीया न तु कमपि विषयमवलम्ब्य।

पाठकेभ्यो नववर्षस्य, वसन्तपञ्चम्या गणतन्त्रदिवसस्य च कृते शुभकामनाः समर्प्यन्ते।

विदुषामाश्रवः

१५-१-२००४

'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

नववर्ष-शुभकामना

(१)

नीलाम्भोधितटे विभङ्गरुचिरो नीलाचले नायको
मूर्त्त्या सप्तविधो निरङ्गवपुषा ब्रिभ्राजमानः परः।
एकाम्रेश्वरकोणसूर्यसहितः कल्पद्रुचिन्तामणि-
र्नूत्नाब्दे पुरुषार्थसिद्धिफलदस्त्रैलोक्यनाथो हरिः॥

-श्री गोपालकृष्ण दाशः
प्रोफेसरः, संस्कृत-विभागः, उत्कल यूनिवर्सिटी, भुवनेश्वर

(२)

उदयगिरितटीं स्फुटाधिरूढश्चतुरधिकद्विसहस्त्रवर्षभास्वान्।
वितरतु विमलैर्यशोभिराढ्यं कवितिलकेषु निरामयं चिरायुः॥

-परमानन्दझा
सचिवः, मन्दाकिनी संस्कृत विद्वत् परिषद् (न्यासः)
६३, विज्ञान विहारः, दिल्ली-११००९२

देवभाषा

डॉ० शिवशरणशर्मा द्विवेदी
५१-विनयनगर, सेक्टर-I
जेलमार्ग, ग्वालियर -४७४०१२ (म०प्र०)

संस्कृताया गिरः सर्वलोके शुभम् ।
तत् प्रसिद्धं महत्त्वं पुनर्वर्धताम् ॥

(१)

अर्थगाम्भीर्यमस्या असाधारणम्
सर्वथा दोषमुक्तं समुच्चारणम् ।
गानमस्या मनोमोहनं तर्पणम्
भारतीयं शुभा केन विस्मर्यताम् ?॥

(२)

देवभाषाऽभिधानं हि लब्धं यया
या स्वकीयैर्गुणैरस्ति मृत्युञ्जया ।
साम्प्रतं चापि या सर्वथा सक्रिया
सा मृतेतीह केनापि मा कथ्यताम् ॥

(३)

वेद-विज्ञान-गङ्गा-तरङ्गालुप्ता
व्यास-वाल्मीकि-भासादिभिः संस्तुता ।
या च शालातुरीयेण सञ्जीकृता
दिव्यशोभामयी वागियं मोदताम् ॥

(४)

याऽस्ति विश्वैकताया महासाधिका
सर्वभेदादिकानां परा भेदिका ।
लोकमाङ्गल्यगीतेश्च या गायिका
विश्वभाषाधिपत्यं तया लभ्यताम् ॥४॥

राष्ट्रियसंहतिः संस्कृतं च

–श्री श्री० सुन्दरराजः,
आइ०ए०एस० (प्राप्तावकाशः
२१, वी०आइ०पी० कालोनी, भुवनेश्वर (उड़ीसा)

भारतराष्ट्रस्य संहतौ अर्थात् अखण्डतायां संस्कृतभाषायाः महती भूमिका वर्त्तते। इयं च भूमिका वेदकालादारभ्य अनुबध्नाति। आचन्द्रार्कम् अनुबध्नीयाच्च। भारतस्य ऐक्यं तथा भारतानां सजातीयत्वं प्रति च विष्णुपुराणे पठ्यमानमेकं पद्यं सर्वेषां विदितचरमेव यथा–

"उत्तरं यत् समुद्रस्य दक्षिणं हिमवद्गिरेः ।
वर्षं तत् भारतं ज्ञेयं भारतीयाऽत्र सन्ततिः ॥" इति।

भारतवर्षस्य प्राचीनतमासु भाषासु प्रधानभूता भाषा संस्कृतभाषेति सर्वे जानन्ति। वेदानां भाषा आर्षभाषा। व्याकरणशास्त्ररीत्या संस्कारं प्राप्य या संस्कृतभाषेति प्रसिद्धा जाता। विना संस्कारेण यदि कोऽपि वाचमुदीरयेत् तर्हि तस्याः अर्थः न स्पष्टतया अवगम्येत। यदा कदा वापि सा अर्थान्तरमेव गमिष्यति। इदं पुनः स्पष्टीक्रियते रामायणे भगवता श्रीवाल्मीकिमहर्षिणा, यथा–

"संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्।"

व्याकरणेन भाषायाः संस्कारप्राप्तिं ततः प्राप्यमानां भूतिमपि प्रशंस्य हनूमद्विषये श्रीरामचन्द्रस्य वचोभिरेव रामायणे भगवान् श्रीवाल्मीकिः एवं निगदति, यथा–

"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम् ॥
\+ + + +
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ।
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्रमुद्यतासेररेरपि ॥"

भर्तृहरिरपि भणति–

"वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते ।"

एतादृशी भूतिकरी मङ्गलमयी च संस्कृतभाषा यदि वेदभाषा तथा देवभाषा इत्यपि व्यपदिश्यते तर्हि किमत्र चित्रम्? भूतसृष्टेरनन्तरं परमात्मना प्रजासृष्टिकृते प्रजापतिरुत्पादितो वेदानध्यापितश्चेति पुराणेभ्यः अवगम्यते। **'यस्य निःश्वसितं वेदाः'** इति वेदाः भगवत एव निरवसितत्वेन वर्ण्यन्ते। अत एव वेदाः अपौरुषेयाः नित्याः इत्यपि कथ्यन्ते। वेदानां नित्यत्वेन भाषाया अपि नित्यत्वं सिद्ध्यति। परन्तु लोकाः अनित्याः। लोकानामनित्यत्वात् **'धाता यथापूर्वमकल्पयत्'** इति वेदोक्तरीत्या धात्रा प्रतिकल्पं अर्थात् प्रतिदिनं उत्पाद्यमानात् लोकसृष्टिवैचित्र्यात् वेदानां तथा भाषायाश्च नित्यत्वं कथमुपपद्यत इति प्रश्न उत्तिष्ठेदपि। ब्रह्माण्डे प्रजापतीनां बहुलत्वात् एकप्रजापतेः लोकसृष्टिकाले अन्यस्य प्रजापतेर्लोकात् भाषा वेदानां संक्रमणस्य संभवादथवा निद्रायाः जागरितस्य प्रजापतेः स्वकीयस्मरणेन परमात्मना अध्यापितानां भाषावेदानां च यथापूर्वमनुसन्धाने शक्त्या वा इदं साध्यमित्यत्र नेह कस्यापि विशयो भवितुमर्हति। यदा कदा वा प्रजापतिः दैत्यापनीतवेदहेतोः मन्दो भवति तदा परमात्मा स्वयमेव दयया दैत्यान् निगृह्य वेदान् प्रत्यानीय प्रजापतिं तानध्यापयतीति पूर्वाचार्योक्तितः अवधार्यते, यथा श्रीनिगमान्त-महादेशिकस्य श्रीहयग्रीवस्तोत्रतः उद्धृतादस्मात् श्लोकात्-

"मन्दोऽभविष्यन्नियतं विरिञ्चः
वाचां निधे वञ्चितभागधेयः ।
दैत्यापनीतान् दययैव भूयोऽ-
प्यध्यापयिष्यो निगमान्न चेत्त्वम् ॥"

अस्यां पृष्ठभूम्यामधुना आद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पः प्रचलति। एतस्मिन् कल्पे सृष्टायां मर्त्यभूमौ जम्बूद्वीपे भारतवर्षे वयं वसामः। यद्यपि भाषावेदानां ज्ञानं जातेभ्यो मर्त्येभ्यो लोकान्तरेभ्य आगतैः विज्ञानिभिर्देवैः अथवा परमात्मनः कृपया लोके अवतरितैरवतारपुरुषैः सम्भाव्यते, तथाऽपि जीवस्य भगवदंशभूतत्वात् स्वधर्मभूतज्ञानविकासेन मर्त्यः स्वयमपि विभिन्नभाषाकलाचारानुत्पादयितुं शक्नोति। दैवेनोत्पादिता भाषा देवभाषा।

इतरा मनुष्यजनिताः मानवभाषाः। देवभाषायाः लिपिरपि दैवी भवति। यतः संस्कृतम् एका देवभाषा, तत एव तस्याः लिपि देवनागरीलिपिरिति व्यपदिश्यते। दण्डिना कथितं ननु **''संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः''** इति। जीवस्य भगवत एवं अंशभूतत्वात् मनुष्यजनितभाषाकलाचारा अपि भगवदनुग्रहेणैव जाताः। मनुष्याणामाविष्काराः यथा शकटवाहन-नौकावाष्पयन्त्राकाशविमानसतन्त्रीवितन्त्री-वार्त्तादूरदर्शनगणितियन्त्र-यान्त्रिक-मनुष्यान्तरिक्षयात्रादिवैचित्र्याणि सर्वाणि भगवत्कृपयैव तैः असृज्यन्त। किन्तु मनुष्येण नूतनतया न किमपि आविष्क्रियते। भगवतः सृष्टिवैचित्र्ये यत् तथ्यं निहितं वर्त्तते तत् सूक्ष्मतया विज्ञाय प्रयोगे आनेतुं स शक्तो भवति। अस्मिन् व्यतिकरे स्वसौकर्याय मनुष्यभाषाः बहवः उत्पादिताः। ताः परस्परस्पर्धापराः भवन्ति। परन्तु ताः संस्कृतभाषाया स्पर्धितुं न शक्नुयुर्नवा इच्छेयुः। अस्माकं भारतदेशे प्राकृतादयो या अपभ्रंशभाषाः जनितास्ता सर्वाः संस्कृतभाषायाः अधमर्णभूताः। केवलं तमिलिति व्यपदिष्टां द्राविडभाषां हित्वा अन्यास्सर्वाः संस्कृतेन बहुशः प्रभाविताः। तमिल्-भाषायामपि संस्कृतभाषायाः संक्रमणं यज्जातं तत् संस्कृतात् स्वीकृतैः बहुभिश्शब्दैः व्यक्तीभवति। संस्कृतजनितत्वात् संस्कृतप्रभावितत्वाच्च प्रान्तीयभाषाः संस्कृतस्य राष्ट्रभाषात्वं प्रणयेन प्रश्रयेण च अङ्गीकृतवत्यस्स्युः। तथा यदि कृतमभविष्यत् तर्हि एषु पञ्चाशदधिकेषु वर्षेषु स्वातन्त्र्यात्परं व्यतीतेषु अस्माकं राष्ट्रस्य ऐक्यं दृढीभूतमभविष्यत्। यद्यपि स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री पण्डित-जवाहरलालनेहरुः संस्कृतस्य अनर्घत्वमस्मत्सभ्यताकलाचाराणामाकरभूतत्वम-जानात् व्यानक् च आहत्य नेतृवर्गेण संस्कृतभाषा राष्ट्रभाषास्थाने मूर्धाभिषिक्ता नाक्रियतेति महानयं विषादस्य विषयः। तथापि राष्ट्रभाषास्थाने स्थापिता हिन्दीभाषा तथा अन्याः संवैधानिकभाषाश्च संस्कृतेन प्रभावितत्वात् क्रमेण राष्ट्रियसंहतिः अद्य वर्धमाना दृश्यते। अस्य मूलकारणं च न गवेष्यं यतः राष्ट्रस्य वैयक्तिकत्वमाध्यात्मिकत्वे आधारितम्। तच्च सनातनधर्ममूलम्। उभयमप्येतत् संस्कृतभाषाभित्तिकं इति पूर्वमेव कथितम्, यतो धर्मः वेदप्रति-पादितः वेदश्च संस्कृतभाषापरः। आध्यात्मिकत्वं च उपनिषदां सारार्थज्ञानेन सांख्ययोगादिशास्त्राणां अध्ययनेन गीतायास्तात्पर्यावगमेन बृंहितं भवति।

भगवत्साक्षात्कारे प्रयतमानैः ज्ञानिभिर्योगिभिश्च भगवान् यथायोगं सेवितो भवति। तादृशैः प्राप्तभगवत्साक्षात्कारैः महात्मभिः एकं मतं वा एको धर्मो वा प्रतिष्ठाप्यते। भारतराष्ट्रे एवंविधा महात्मानो बहवो अभूवन्। अत एव अस्माकं राष्ट्रं धर्माणामेक आकर इति कथ्यते। केवलं क्रीस्तुमुस्लिमधर्मौ हित्वा अन्ये सर्वेऽपि धर्माः यथा जैनबौद्धशिखादिधर्माः अस्मिन् देशे एव लब्धजन्मानः। धर्माणां वैविध्ये सत्यपि एक एव भगवान् तथा जीवात्मा स्वयं भगवत एव बिम्बः अथवा अंश इति वेदान्ते प्रतिपाद्यते। गीतायां भगवान् श्रीकृष्णः स्वयं कथयति।

"येऽप्यन्यदेवता भक्ताः यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥

\+ \+ \+ \+

लभते हि ततः कामान् मयैव विहितान् हि तान् ।
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥"

'तत्त्वमसि श्वेतकेतो' 'नित्यो नित्यानां चेतनश्चेतनानां बहूनां यो विदधाति कामान्' 'एकमेव अद्वितीयं ब्रह्म' 'यस्येदमात्मा शरीरम्' 'द्वा सुपर्णा सयुजा सखायौ समानं वृक्षं परिषस्वजाते। तयोरेकः पिप्पलं स्वादु अत्ति। अनश्नन्नन्यो अभिचाकशीति' इत्यादीन्युपनिषद्वाक्यानि अस्माकं याथातथ्यबोधकानि संस्कृतपराणि यावत्पर्यन्तं तिष्ठन्ति तावत्पर्यन्तं संस्कृतस्य पृथक् स्थानं विनाऽपि राष्ट्रस्य संहतिः दृढा तिष्ठेदेव। परन्तु अस्माकं भारतजनाः स्वयमेव संस्कृतभाषायाः उपयुक्तत्वं ज्ञात्वा तस्या अध्ययनं लोलुपतया चिकीर्षेयुरिति न मे संशयस्य लेशोऽपि वर्त्तते।

प्राचीनकालेऽपि संस्कृतभाषायाः कदाऽपि उन्नतिः कदाऽप्यवनतिर्वटते स्म। पूर्वमेव प्रोक्तं यत् वेदानामार्षभाषा संस्कारप्राप्त्यनन्तरं संस्कृतभाषेति विदिताऽभूत्। पूर्णसंस्कारप्राप्तेः पूर्वं पुराणेतिहासशास्त्राणि बहूनि सरलभाषायाम् आर्षप्रयोगैस्सह निर्मितानि बभूवुः। आदिकाव्ये रामायणे अतीव सरलभाषया निबद्धेऽपि तत्र तत्र बहवः आर्षप्रयोगाः दृश्यन्ते। सारल्यदृष्ट्या रामायणकाले भाषा सा भूयिष्ठैः भाष्यमाणैव बभूवेति ऊहितुं शक्यते। परन्तु

बौद्धमतविकाससमये तस्य मतस्य वेदबाह्यत्वात् वेदविरोधहेतोश्च पाळीभाषायाः अभ्युदयस्समभूत्। धम्मपदग्रन्थः जातककथाश्च पाळीभाषायां विरचिता आसन्। परन्तु बौद्धधर्मस्य आध्यात्मिकत्वं स्थापयितुं संस्कृतस्य आवश्यकता उपलब्धा। ततः वैभाषिकसौत्रान्तिकमाध्यमिकयोगाचारविचारग्रन्थाः संस्कृतभाषायां व्यरच्यन्त। वेदान्तिभिस्तथा अन्यमतानुयायिभिश्च सह तर्करीत्या वादप्रतिवादाः प्रचलन्ति स्म। गुप्तकाले यदा वैदिकधर्मस्य पुनरुत्थानमभूत् तदा संस्कृतभाषाया अपि औन्नत्यं समघटत। तत एव गुप्तकालः स्वर्णयुग इत्युद्गीयते। संस्कृतभाषायां बहूनि काव्यनाटकानि शास्त्रग्रन्थाः ज्योतिर्विद्यागणित-विद्यादिग्रन्थाश्च तथा धनुर्वेदायुर्वेदादिग्रन्थाश्च निरमीयन्त। यद्यपि भारतवर्षे बहूनि स्वतन्त्रराजशासितानि राज्यानि अराजन्त तथापि आसेतोः आहिमाचलं च संस्कृतभाषा भद्रभाषा तथा बहूनां राज्यानां राजभाषा चासीत्। बौद्ध-धर्मावलम्बी राजा श्रीहर्षोऽपि स्वयं संस्कृतपण्डितः कविरासीत्। **रत्नावली नागानन्दमिति** द्वे संस्कृतनाटके तेन विरचिते। तस्य जीवनकथाऽपि तस्य सभायां विराजितेन तस्य सुहृदा कविमणिना बाणभट्टेन 'हर्षचरितम्' इति शीर्षकेण ग्रथिता। तस्य पूर्णग्रन्थस्य अलाभेऽपि प्रकाशितांशात् तस्य ग्रन्थस्य अनुत्तमा गुणाः ज्ञायन्त एव। नाटके शिक्षितानां पण्डितानां भाषा संस्कृतभाषा आसीत्। अशिक्षितानां पामराणां स्त्रीणां भाषा तु या काचित् प्रान्तीया अपभ्रंशभाषा अभूत्। तत एव नाटकरचनासु संस्कृतस्य प्रान्तीयभाषाणामपि सम्मिश्रणमुपपन्नमासीत्। पण्डिताः राजानो देवाः ऋषयो ब्राह्मणाश्च संस्कृतेन समलपन्। परं पामराः अशिक्षिताः स्त्रियश्च प्राकृतादिप्रान्तीयापभ्रंशभाषया समभाषन्त।

क्रीस्तोः पूर्वकालेऽपि शूद्रकस्य राज्ञो **मृच्छकटिके** तथा भासनाटकेषु च एवमेव संस्कृतप्राकृतसमन्वयो दृश्यते। गुप्तानां स्वर्णयुगेऽपि नाटकेषु एतादृशसमन्वयो दृश्यते। परन्तु क्रमशः पण्डितानां स्वस्वपाण्डित्ये अवलेपहेतोः पाण्डित्यपरिपूर्णग्रन्थाः अर्धशिक्षितानामवधारणदूरभूताः ग्रथ्यमाना अभूवन्। गद्यग्रन्थाः ये तावत् दीर्घसमासबहुलबह्वलङ्कारकठिनपदप्रयोगपरवाक्यैर्ग्रथिताः तेऽपि प्रचुरीभूता आसन्। माघमहाकवेश्शिशुपालवधमहाकाव्यं श्रीहर्षमहाकवेः नैषधीयचरितमहाकाव्यं अनन्तकवेः चम्पूभारतं च जटिलग्रन्थानामुदाहरणभूतानि।

पण्डितानामवलेपः संस्कृतभाषायाः ह्रासे हेतुरभूत्। मुस्लिमानां शासनकाले संस्कृतभाषायाः प्रभावो भृशं न हीयते स्म। यद्यपि पार्सीभाषा मुस्लिमानां राजभाषाऽऽसीत् तथाऽपि पण्डितराजजगन्नाथः शाहजहान्चक्रवर्त्तिनः सभायां संस्कृतकविरासीत्। धाराशुकोव् नाम राजकुमारः वह्वीः उपनिषदः पर्सियन् भाषायामनुवादितवान्। हम्मीरनामा मुस्लिमो राजा स्ववीर्याय संस्कृतकविभिः प्रशंस्यमानो बभूव। परन्तु पाश्चात्त्यानां विशिष्य ब्रिटिषाणामागमनात् परं संस्कृतभाषायै दीयमानं राजकीयसम्माननं भृशं अहीयत। अवश्यं क्षुद्रराजवंश्यैः धनिकैर्भूमिपतिभिश्च तत्र संस्कृतपण्डिताः आदृताः, सम्मानिताश्च अभवन्। स्वातन्त्र्य-प्राप्तेरनन्तरं संस्कृतभाषा सर्वभारतराष्ट्रभाषा भविष्यति तथा महतीं मान्यतां प्राप्स्यतीति यः स्वप्नो दृश्यमानोऽभूत् स न सत्योऽभूत्। महात्मा गान्धी तथा अरविन्दाश्रमगता श्रीमा च संस्कृतं भारतैः सर्वैरध्येतव्यं इत्यैच्छताम्। श्रीमा तां राष्ट्रभाषामप्यैच्छत्। परन्तु हिन्दीभाषा राष्ट्रभाषा बभूवेति इतिहासः। राष्ट्रभाषारूपेण न स्थापितेति संस्कृतभाषायाः महत्त्वं न हीयते। संस्कृतवाङ्मयं तु महासागर इव। तस्मिन् स्थितानि रत्नानि अनर्घाणि। संस्कृतं विना प्रान्तीयभाषाः पुष्टिं प्राप्तुं न शक्नुयुः। प्रान्तीयभाषाविदोऽपि एतदुररीकुर्वन्ति। तथाऽपि राज्येषु यत्र पूर्वं संस्कृतस्य निर्बन्धमूलकमध्ययनं विद्यालयेषु अभूत् तादृशमध्ययनं परित्यक्तं वा सङ्कुचितं वा जातम्। अस्य कारणं तु त्रिभाषासूत्रमिति सर्वे जानन्ति। पुनरपि तेषु राज्येषु संस्कृतस्य बाध्यतामूलाध्ययनस्य आवश्यकतामुपलभ्य कार्यक्रमो विधीयमानो वर्त्तते। त्रिभाषासूत्रस्य चतुर्भाषासूत्रं भवतु। संस्कृतस्य च प्रान्तीयभाषया हिन्दीभाषया आंग्लभाषया च सह अध्ययनं भवत्विति बहवः अभिप्रयन्ति।

ओड्राज्ये मध्यविद्यालये बाध्यतामूलकसंस्कृताध्ययनं प्रचलति। विद्यालयस्तरे .हिन्दीभाषास्थाने संस्कृतं वैकल्पिकभाषारूपेण अध्याप्यते। संस्कृतस्य मातृभाषास्थानमपि दीयेत यतः तत् एम्. आई. एल्. स्थानं प्राप्तु शक्नुयात्। एवमेव बहुषु अन्यराज्येषु संस्कृतस्य स्थानं उपचीयमानं भविष्यतीति मन्ये। पूर्वकालेऽपि संस्कृतं भारतस्य सर्वप्रान्तेषु सम्पर्कभाषा बभूव इति सर्वेषां विदितमेव। नोचेत् कथं दक्षिणापथे केरले कालडिग्रामे जातः आदिशङ्करः सर्वत्रापि भारते परिभ्रम्य वादेषु मण्डनमिश्रादिपण्डितान्

विजित्य स्वकीयमद्वैतमतं प्रचार्य केदारनाथे देहत्यागं कर्तुमशकत्। कथं वा बदरीनिकटस्थज्योतिर्मठे पुरुषोत्तमधाम्नि पुरीननगरस्थिते गोवर्धनमठे, शृङ्गगिरौ सह्याद्रौ स्थापिते मठे तथा सौराष्ट्रे द्वारवत्यां स्थापिते मठे आदिशङ्करः आम्नायपीठानि स्थापयितुं अशकत्। शिष्टाः निष्ठावन्तश्च कथं कोणात् कोणात् विभिन्नराज्यस्थित तीर्थानां क्षेत्राणां च पर्यटनं कर्तुमशकन्। कथं गत्वा बदरी-नैमिष-वाराणसी-गया-गङ्गासागरसङ्गमप्रयागपुष्करप्रभास नासिकामरनाथ-अमरकण्टकनर्मदा-गोदावरीरामेश्वरगोकर्णसोमनाथ-श्रीनाथ-द्वारवृन्दावनगोकुलायोध्याचित्रकूटादिक्षेत्रतीर्थाण्यसेवन्त । अद्यापि सेवन्ते। सर्वमिदं भारतस्य अखण्डतया अस्मत्पुराणेतिहासशास्त्रैः संसाधितया संपद्यते। तत्र संस्कृतमेकमन्तस्स्रोत इव प्रवहमानमस्माकं संहत्यै मूलकारणं भूत्वा तिष्ठति।

सर्वकारे किञ्चिदकुर्वाणेऽपि संस्कृतभाषायाः प्रभावेण भारतसंहतिः संरक्षिता तिष्ठेदेव। परन्तु सर्वकारः किमपि कर्त्तुं बाधितस्स्यात्। यतः सर्वकारोऽयं गणतन्त्रशासनपरो जनानामिच्छानुसारं प्रवर्त्तितुमर्हति। अनेनैव कारणेन मन्ये केन्द्रीयसाहित्य-अकादम्यपि संस्कृतस्य भारतसंहतेः हेतुत्वं विचारयितुं सम्मेलनमायोजितवती। अन्ते मयैव रचितेन संस्कृतस्य भारतसंहतौ हेतुत्वं प्रतिपादयता श्लोकेन मम वाङ्मुखमुपसंजिहीर्षामि ।

दिव्या दिगन्तमहिता दिविषन्निषेव्या
नव्येतराऽपि नवतां परिपोषयन्ती ।
सुव्याकृता सुमधुरा सुरभारतीयं
अव्याजहेतुरिह भारतसंहतौ नः ॥४॥

निर्वासनं कृतम्

–प्रो० हरिदत्त शर्मा, प्रयागः

हाऽऽयोध्ये ! त्वमभूरभिशप्ता
किमकार्यं विहितम् ?
राजतिलककाले रामस्य तु
निर्वासनं कृतम् !!

श्यामो जगदभिरामो रामः
लोकहृदयविश्रामो रामः ।
सिंहासनं विनाऽपि राजते
मुदितो ललितललामो रामः !!

तस्य बहिष्करणेनाधःकरणं तवैव घटितम् ॥ राज.....

हहा ! दुर्भगा नगरी जाता
तमनुगतो हि लक्ष्मणो भ्राता ।
श्रीहीनामिव पुरीं विधाय च
विपिनं याता सीता माता ॥

निजैर्गुणगणैश्चरितैस्तैः सकलं भुवनं भरितम् ॥ राज.....

सन्तु वने ननु बहवो दोषाः
हिंस्रजन्तवो धृतबहुरोषाः ।
मायामया राक्षसा नैके
खरप्रस्तराः कण्टककोषाः ॥

सकलमिदं सोढं हि निजपदं कर्मपथे प्रहितम् । राज.....

हृष्टोऽपि स्यात् कोऽपि दुर्मनाः
वा हसन्तु खलु केऽपि दुर्जनाः ।
निर्जनेऽभिनन्दनमालभते
रामं वने नमन्ति सज्जनाः ॥

अनुदिनमुन्नतिपदमारोहति तेन व्रतं धृतम् ॥ राज.....

चलितो यः स्वगृहादसहायः
पदे पदे बाधकान्तरायः ।
विश्वं तस्य कुटुम्बं जातं
अधुना तस्यामिताः सखायः ॥

नोपहासविषयः खलु येन हि खलसैन्यं शमितम् ॥ राज.....

लाभाः नैकेऽस्मिन् वनवासे
बहुमुनिजनसङ्गमः सकाशे ।
नवसुहृदः परिचया अनेके
विक्रमकथा रक्षसां नाशे ॥

त्रैलोक्ये प्रसृतं सगौरवं रामस्य हि चरितम् ।राज.....

निर्वासितेन बद्धः सेतुः
योऽभूदाततायिवधहेतुः ।
देशे देशे नगरे नगरे
स्थापित एव प्रतिष्ठाकेतुः ॥

को निज-परदेशो मनस्विनां विदेशेऽपि विजितम् ॥ राज.....

स्वगृहे यः सहते ह्यवमानम्
स विदेशे लभते बहुमानम् ।
स्थान-देशसीमाऽपि च्छिन्ना
तस्य सर्वतो गुणगणगानम् ॥

तत्सुकर्मतेजसां मण्डलं दूरदिग्भ्य उदितम् ॥ राज.....

अभविष्यन्नो चेद् वरदानम्
स्यान्नु कथं राघव-वनयानम् ।
निजकुल-पुरगौरववृद्ध्या सह
कोऽलप्स्यत विश्वे बहुमानम् ॥

राम-नामसङ्गादवधेन हि लब्धं यशोऽमितम् ॥ राज.....

याति वनं सीता

--प्रो० श्रीनिवास रथः
१८, कालिदासमार्गः, उज्जयिनी-४५६०१०

गङ्गादर्शनदोहददलिता,
नापि शङ्किता न चापि भीता,
मिथिलाभूमिसुता, याति वनं सीता ॥

गहनविपिनसञ्चरणपरिचिता
रघुवरधर्मचारिणी दयिता ।
अतिनिष्करुणपथं प्रति नीता
देवयजनजनिता, याति वनं सीता ॥

मृगमायया रावणापहृता
निशिचरबलसंहरणरक्षिता ।
पुनरनन्तविरहेण गृहीता
रामे समाहिता, याति वनं सीता ॥

परिचिनुते नहि रामशासनं
किमु वा जाता कोपभाजनम् ।
निर्वासनपरिवादपरीता
रामराज्यमुषिता, याति वनं सीता ॥

चेतना विलीयते

–प्रो० श्रीनिवास रथः
१८, कालिदासमार्गः, उज्जयिनी–४५६०१०

सदाशयाकुलीकृते, विलोललोकजीवने,
विषं सुधेति पीयते ! चेतना विलीयते ।

विदेशभाषयाधुनापि लोकनीतिबोधनं
परार्थनीतिसाधनानुरूपमर्थचिन्तनम् ।
अबोधविक्लवैर्जनैः प्रशासनाधिकारिणां
दुरूहमन्त्रणार्थबोधयन्त्रणानुभूयते ॥
चेतना.....

स्वतन्त्रतानुशायि लोकतन्त्रशक्तिसम्मितं
नवीनसंविधानकं यथा तथा नियोजितम् ।
अदूरदर्शिराजनीतिचत्वरेषु नायकैः
स्वकीयलाभयोजनैव तत्त्वतः प्रयुज्यते ॥
चेतना.....

चिराय नीतिहीनराजनीतिवृत्तिमाश्रिता
विपक्ष-पक्षभूमिकाऽपि दृश्यते विरूपिता ।
प्रसह्य सम्पदासुरी दुनोति विश्वमानसं
स्वतन्त्रता सुवर्णपुष्पितेति कैः प्रतीयते ॥
चेतना.....

अजस्रभोगविक्लवाततायिनां समुद्धता
विवेकहीनताऽधुना दिशामुपान्तविस्तृता ।
दुरन्तपापकीलितैरनन्तशक्तिमत्तया
बताद्य वैश्वजीवनं विनाशमाशु नीयते ॥
चेतना.....

जयति भारतम्

–प्रो० श्रीनिवास रथः
१८, कालिदासमार्गः, उज्जयिनी-४५६०१०

पराधीनताविमुक्तिपर्वणि
सुवर्णकुसुमोदयविभूषितम् ।
जयति भारतम् ॥

सनातनी सर्वत्र सुमहिता
यत्र भासते श्रुतिपरम्परा ।
बहुजनहितचिन्तनालोकिता
विभाति रमणीया वसुन्धरा ॥

मानवधर्मोपदेशवर्त्मनि
विश्वगुणादर्शतामुपगतम् ।
जयति भारतम् ॥
पराधीनता.....

सम्पदासुरी पशुबलार्जिता
भयमुपजनयति मानगर्विता ।
अहमहमिकया भोगपरवशं
विपरिवर्तते विश्वमानसम् ॥

दुरभिसन्धिकुण्ठिते जीवने
यमनियमोदाहरणानुरतम् ।
जयति भारतम् ॥
पराधीनता.....

दिशि दिशि विततातङ्कशङ्किता
सीदति विधुरा मनुजसभ्यता ।
धर्मविवेकविकलधार्मिकता
विहरति भुवि संहारोन्मत्ता ॥

भारतजनमानसं वितनुते
शान्तिवाचनामृतमनारतम् ।
जयति भारतम् ॥
पराधीनता.....

पितरौ विना भ्रूणसन्धानं
यथा कलयते नवविज्ञानम् ।
मानवधर्मोन्मूलनाऽऽविलं
दुर्गतिमाकलयति जगदखिलम् ॥

सुमतिकुमतिविज्ञानदर्शने
शिवसङ्कल्पोपासनारतम् ।
जयति भारतम् ॥
पराधीनता.....

अपूर्वभौतिकविकासचकितं
परमधुनातनमानवचरितम् ।
परधनपरवशताऽऽकुलीकृतं
बहु मनुते जीवनमसंस्कृतम् ॥

भारतीयपरमार्थचिन्तनं
नियमयतीहायतिगतागतम् ।
जयति भारतम् ॥
पराधीनता.....

किं कुर्यात्

–डा० रमाकान्त शुक्लः
'रमालयः', आर–६ वाणी विहारः, नई दिल्ली–११००५९

न विद्युन्नो हसन्ती भामिनी नापि प्रिया पार्श्वे ।
तुषारेऽयं जनः शून्ये च तापे मित्र ! किं कुर्यात् ॥
'मयेयं चालिता मेट्रो-सुगन्त्री जनमनोहर्त्री' ।
हसति नेतुर्वचः श्रुत्वा जनो, नेताऽत्र किं कुर्यात् ॥
न युद्धं नापि शान्तिर्नैव मैत्री नापि शत्रुत्वम् ।
न संवादो न मौनं चावयोः कः कोऽत्र किं कुर्यात् ॥
अहो ग्रीष्मे न पेयं शीतलं त्वयका सुलभ्येत ।
न चोष्णं भोजनं शिशिरे धनं ते ब्रूहि किं कुर्यात् ॥
त्वया नेतृब्रुवाः संसेविताः स्वीयाध्ययनकाले ।
तृतीयश्रेणिमापन्नस्य ते वद कोऽत्र किं कुर्यात् ॥
न शौचं नापि चाचारो न सत्यं येषु विद्येत ।
सखे ! तेषां सपर्या मे व्रतम्, मे कोऽपि किं कुर्यात् ॥
इदं निर्वाचनं प्राप्तं पुनष्टिकटेच्छवोऽद्यत्वे ।
दलाद्दलमाविशन्त्येते, अमीषां कोऽत्र किं कुर्यात् ॥
(१७.१.२००३)

'धनाद्धर्मं ततः सुख'मित्ययं सिद्धान्त उच्छिन्नः ।
'धनाट्टिकटं ततः सत्ता'धुना मे कोऽपि किं कुर्यात् ॥
अयं सद्दाम आस्ते पञ्जरे बद्धो यथा सिंहः ।
प्रवर्धन्तेऽस्य रिपवो तांश्च पश्यन्नेष किं कुर्यात् ॥
(१४.१२.२००३)

सदा यो वर्धयन्नातंकवादं शासनं ह्यकरोत् ।
शरव्यः सोऽद्य जातस्तस्य रोदिति, कोऽस्य किं कुर्यात् ॥
(१४.१.२००४)

यानावरोधो दुस्त्यजः, शकटावरोधो दुस्त्यजः

–डा० रमाकान्त शुक्लः
'रमालय', आर-६ वाणी विहारः, नई दिल्ली-११००५९

लाजवन्तीगार्डनं स्यात्स्यादथो धौलाकुआँ ।
स्याच्च वा मायापुरी यानावरोधो दुस्त्यजः ॥
शकटावरोधो दुस्त्यजः ॥
आइ०टी०ओ० स्यादथो शाहेदरा वाथो भवेत् ।
शक्तिनगरं वा भवेत् यानावरोधो दुस्त्यजः ॥
काररूढो वा भवेत् स्कूटरसुरूढो वा भवेत् ।
स्याच्च वा वाहनपटुः, यानावरोधो दुस्त्यजः ॥
जनपथो वा स्यादथो राज्ञां पथो वा स्यादयम् ।
अस्तु सी०पी० चक्रकं यानावरोधो दुस्त्यजः ॥
भानुजासेतुर्भवेद्वा नौइडामार्गोऽथवा
मालचामार्गोऽथवा यानावरोधो दुस्त्यजः ॥
रा०म०लो० चक्रं भवतु वा स्यादथोऽप्याश्रमधरा ।
स्याच्च दिल्लीस्टेशनं यानावरोधो दुस्त्यजः ॥
मेटरोमार्गेषु भवताद्वा न वा जामस्थितिः ।
किन्तु पर्वतगंजके यानावरोधो दुस्त्यजः ॥
रक्तचापचिकित्सया को लाभ आस्ते मित्र ते ।
लभ्यते स्वप्नेऽपि यदि यानावरोधो दुस्त्यजः ॥
ब्रूहि गत्वा प्रेयसीं त्वं क्रोधरक्तेक्षणमुखीम् ।
'मां क्षमस्व विलम्बिनं यानावरोधो दुस्त्यजः ॥
भोः प्रियामिलनोत्सुका नीत्वा करे चलभाषकम्[१] ।
सत्वरं पद्भ्यां व्रजत, यानावरोधो दुस्त्यजः ॥
साम्प्रतं निश्चीयते मयका विना भ्रान्तिं सखे ।
यामि पद्भ्यामेव यदि यानावरोधो दुस्त्यजः ॥

१. मोबाइलफोनम्

(हास्य-व्यंग्यम्)

वैभवाप्ति-साधनम्

–डा० शिवशरणशर्मा द्विवेदी
५१, विनयनगर, सेक्टर-I,
जेलमार्गः, ग्वालियर-४७४०१२ (म०प्र०)

धारय छद्म-तपस्वी-वेशम्
इत्थं स्थास्यति सदा जीवनेऽभीष्टं सौख्यमशेषम् ।

(१)

भस्म-विभूषित-देहो भूत्वा, चन्दन-चर्चित-भालः,
केशकलापे मालां धृत्वा, प्राप्स्यसि सिद्ध-सुवेशम् ।

(२)

यदा-कदा तारस्वरेण कुरु, 'काली'-नामोच्चारम्,
ततो निवस कस्मिंश्चिन्नगरे, प्राप्य धनिक-परिवेशम् ।

(३)

बहुभक्ता आयान्तु समीपे, शृणु एतस्योपायम्,
ज्ञानं विनाऽपि मन्त्रतन्त्रयोः, किञ्चित्कुरूपदेशम् ।

(४)

नव्य-कबीरो वक्ति सखे! शृणु, त्वयि कलियुगमनुकूलम्,
वैभवराशिमपारं प्राप्स्यसि, चान्ते दिवि प्रवेशम् ।

देववाणी-परिषद्वार्ता

देववाणी-परिषदोऽष्टाविंशः स्थापना-दिवस-समारोहः

'देववाणी-परिषद्, दिल्ली'ति संस्थायाः अष्टाविंश**:स्थापनादिवस समारोहः** 'राजधानी कालेज, राजा गार्डन, नई दिल्ली-११००१५'-इत्यत्र १३.१२.२००३ तमे दिनाङ्के समायोजितोऽभूत्। अस्मिन्नवसरे विद्वदभिनन्दनं, काव्यपाठः, अर्वाचीनसंस्कृतस्य प्रदर्शनी, नाट्यप्रस्तुतिः, **'अर्वाचीनसंस्कृतस्य पञ्चविंशतिवर्षाणी'**तिविषयिणी परिचर्चा विदुषां भाषणानि चाभवन्।

उद्घाटनसत्रम् राजधानी कालेजस्य सम्मेलन-कक्षे आयोज्यत। प्रो० रवीन्द्रनागरस्य वेदपाठेन सत्रं प्रारब्धम्। तदनु **'वाणीं वयं वन्दामहे'**इत्यनेन ध्वन्यंकितेन गीतेन वाणीवन्दना सम्पन्ना। प्राचार्येण डा० बिशनसिंहयादवेन अतिथिभ्यो देववाणी-परिषदे च स्वागतं व्याहृतम्।

अस्मिन् वर्षे राष्ट्रपतिसम्मानितस्य प्रसिद्धसंस्कृतज्ञार्थशास्त्रिणः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतिचरस्य किञ्च आइ० सी० एच० आर० संस्थाध्यक्षस्य प्रो० वा० रा० पञ्चमुखी-महाभागस्य परिषत्पक्षतो ऽभिनन्दनमक्रियत। उद्घाटनसत्राध्यक्षेण 'इण्टरनेशनल एसोसियेशन ऑफ संस्कृत स्टडीज'-संस्थाध्यक्षेण किञ्च वाराणसी-दरभंगास्थयोः संस्कृतविश्व-विद्यालययोः भूतपूर्वकुलपतिना प्रो० रामकरणशर्मणा पञ्चमुखीमहाभागाय और्णोत्तरीयार्पणेन, प्राचार्येण डा० यादवेन माल्यार्पणेन परिषन्महासचिवेन डा० रमाकान्तशुक्लेन च साहित्यार्पणेनाभिनन्दनं व्याहृतम्।

अस्मिन्नवसरे **'अर्वाचीनसंस्कृत'**स्य प्रदर्शन्यप्यायोज्यत यस्या उद्घाटनं 'इन्स्टीच्यूट ऑफ इन्फॉर्मेशन टैक्नोलॉजी एण्ड मैनेजमेंट, जनकपुरी, नई दिल्ली-११००५८' इत्यस्याः संस्थायाः संस्थापकेन श्रीजगदीशचन्द्रशर्मणा दीपदीपनेन कृतम्। तेन संस्कृतस्य पुनर्जागरणस्यावश्यकता रेखांकिता।

ग्रन्थोन्मीलनसत्रम्

ग्रन्थोन्मीलनसत्रस्याध्यक्ष्यं प्रो० वा०रा० पञ्चमुखी-महाभागेन कृतम्। अस्मिन्ननुष्ठाने अर्वाचीनसंस्कृतस्य पञ्चविंशवर्षीयाणां चतुर्ण्णामङ्कानां समुन्मीलनं प्रो० पञ्चमुखिना, प्रो० रामकरणशर्मणा, श्रीजगदीशचन्द्रशर्मणा किञ्च दिल्लीसंस्कृतअकादमीसचिवेन डा० श्रीकृष्णसेमवालेन कृतम्। ग्रन्थोन्मीलन-सत्रस्य मुख्यातिथिना दिल्लीविश्वविद्यालयस्य संस्कृत-विभागाध्यक्षेण प्रो० देवेन्द्रमिश्रेण देववाणी-परिषदा एकोत्तरशत (१०१)

तमग्रन्थरूपेण प्रकाशितस्य पं० दुर्गाचरणशर्मणा च सम्पादितस्य **'श्रीउच्छिष्ट-गणपतिरहस्यम्'**इत्येतन्नाम्नो ग्रन्थस्य लोकार्पणं कृतम्। प्रो० मिश्रेण वैदुष्यपूर्णे स्वभाषणे गणेशस्य विविधानां रूपाणां परिचयो दत्तः। ग्रन्थसम्पादकः पं० दुर्गाचरणशर्मा ग्रन्थस्य परिचयमदात्। ग्रन्थोन्मीलनसत्रस्य सञ्चालनं डा० इच्छारामद्विवेद 'प्रणवेन' कृतम्। प्रो० पञ्चमुखिना समुन्मीलिता अंकाः श्रीहरिन्यास-न्यासिने श्रीआनन्दकुमाराय समर्पिताः।

'अर्वाचीनसंस्कृतस्य पञ्चविंशतिवर्षाणी'ति विषयमवलम्ब्य समायोजितस्य **परिचर्चासत्रस्य**ध्यक्ष्यं राष्ट्रियसंस्कृतसंस्थानस्य (मानित-विश्वविद्यालयस्य) कुलपतिना प्रो० वेम्पटिकुटुम्बशास्त्रिणा कृतम्। तेनोक्तं यत् पत्र-पत्रिकासु प्रकाशितायाः सामग्र्याः सूचीकरणस्य वर्गीकरणस्य च महती आवश्यकता विद्यते। तथा कृते सति समकालीनरचनानां चिन्तनस्य च गुणपरिमाणदृशा आकलनं सम्भाव्यते। प्रो० शास्त्रिणा अर्वाचीनसंस्कृतस्य पञ्चविंशवर्षपूर्तौ हर्षोऽभिव्यक्तः पत्रस्य रजत-जयन्तीवर्षसंक्रमणे च शुभकामनाः प्रदत्ताः। परिचर्चायां जवाहरलालनेहरूविश्वविद्यालय-विशिष्टसंस्कृताध्ययनकेन्द्राध्यक्षा डा० शशिप्रभाकुमारमहाभागा, 'वर्ल्ड एसोसियेशन ऑफ वैदिक स्टडीज'-संस्थायाः भारतशाखायाः सचिव-पदमलंकुर्वाणा डा० श्रीमती शशितिवारीमहाभागा, 'मीमांसा'संस्थाध्यक्षो डा० रामसुरेशपाण्डेयमहाभागश्च अर्वाचीनसंस्कृते प्रकाशितायाः सामग्र्याः परिचयं ददुः। परिचर्चासत्रस्य मुख्यातिथिरूपेणाभिभाषता दिल्लीसंस्कृतादमी-सचिवेन किञ्च गोस्वामीगिरधारीलालशास्त्रीप्राच्यविद्याप्रतिष्ठाननिदेशकेन डा० श्रीकृष्णसेमवालेन प्रोक्तं यत् संस्कृतपत्रिकास्तदैव सार्थका भविष्यन्ति यदा एतासां पाठका भूयांसो भवेयुः।

अर्वाचीनसंस्कृतस्य प्रधानसम्पादकेन डा० रमाकान्तशुक्लेन पत्र-सम्पादनविषयिणोऽनुभवाः श्राविताः। तेनोक्तं यदद्यावधि षट्सहस्राधिकपृष्ठेषु गद्य-पद्यात्मिका अनेकाः विधा अर्वाचीनसंस्कृते प्रकाशिताः या शाश्वत-जीवनमूल्यानां समकालीनयुगबोधस्य च कलात्मिकामभिव्यक्तिं नवनवाभिः शैलीभिः कुर्वन्ति। एतासां सम्पादनं प्रकाशनं च कठिनं सदपि उत्साह-वर्धकमनुष्ठानमस्ति। त्रिशतप्रायाणां लेखकानां रचनासु लेखेषु च संस्कृतरचनाकाराणां सूक्ष्मनिरीक्षणशक्तिः समयोचितभावना च दृग्गोचरीभवतः। अर्वाचीनसंस्कृते प्रकाशिताः अनेका रचनाः पृथक् पुस्तकाकारेणापि

पश्चात्प्रकाशिता जाताः। अनेका रचनाः पाठ्यक्रमेषु,इण्टरनेटे, आकाशवाण्यां दूरदर्शने च स्थानमाप्नुवन्। डा० शुक्लेन सूचितं यदर्वाचीनसंस्कृतस्य **'रजत-जयन्ती'**-मालक्ष्य एकः सन्दर्भग्रन्थोऽपि प्रकाश्यते यत्राद्यावधि प्रकाशितसामग्र्याः सूचीकरणं विधास्यते।

परिचर्चासत्रान्ते अर्वाचीनसंस्कृते प्रकाशितानां काव्यानां पाठोऽभूत्। डा० इच्छारामद्विवेद 'प्रणवेन' स्वरचनाः श्राविताः। श्रीवीरेन्द्रकुमारेण डा० रमाकान्तशुक्लस्य प्रसिद्धं गीतं **'भांति मे भारतम्'** श्रावितम्। तदनुगीतमिदं डॉ० शुक्लेन सह समूहगानरूपेणाप्युपस्थितजनैर्गीतम्। प्रो० पञ्चमुखीमहाभागेन स्व कविताः श्राविताः। अस्मिन्नवसरे देववाणी-परिषत्प्रकाशितं साहित्य-मुपस्थितेभ्यो जनेभ्यो ऽदीयत। प्रो० कुटुम्बशास्त्री, प्रो० रामकरण शर्मा, प्रो० वा० रा० पञ्चमुखी, प्रो० देवेन्द्र मिश्रः, डा० शशिकुमार-महाभागा डा० रमाकान्तशुक्लश्च साहित्यवितरणञ्चकुर्वन्।

परिषत्पक्षतः समारोहस्य व्यवस्थायै सहयोगकृद्भ्यः मनीष अग्रवाल-हन्नी-सन्दीप गोयल-सुनीलगुप्तेभ्यः छात्रेभ्यः प्रमाणपत्राणि डा० रामकरण-शर्मणा प्रदत्तानि। परिचर्चासत्रे राजधानीकालेजस्य वाणिज्यविभाग- प्रवाचकः श्रीदुर्गेशकुमारश्रीवास्तवोऽपि संस्कृतस्यायोजनानां महत्त्वं प्रकटी- कृतवान्। आलोकभारतीसंस्थाध्यक्षः श्रीरमेशचन्द्रशास्त्री अन्ये चानेके संस्कृतानुरागिणः समारोहे उपातिष्ठन्। परिचर्चासत्रस्य सञ्चालनमर्वाचीनसंस्कृतस्योप-सम्पादकेन अभिनवशुक्लेन कृतम्। धन्यवाद-ज्ञापनं परिषदः कार्यसमिति-सदस्येन आनन्दवर्धनशुक्लेन कृतम्।

(२) देववाणी-परिषत्प्रकाशितग्रन्थानां लोकार्पणम्

उज्जयिन्यामायोजिते कालिदाससमारोहे डा० इच्छारामद्विवेद 'प्रणव' प्रणीतस्य **'प्रश्नचिह्नस्य'** किञ्च डा० रामविनयप्रणीतायाः **'शाश्वती'**ति काव्यमालिकाया लोकार्पणमभूत्।

२.१.२००४ तारिकायां प्रयागे 'बाई का बाग' इत्यत्र 'दुर्गापूजापार्के' आचार्य डा० इच्छारामद्विवेदी 'प्रणव' महाभागस्य वाल्मीकिरामायणकथा वाचनपूर्तिपूर्वसन्ध्यायां देववाणी-परिषदा प्रकाशितायाः **'प्रणवरचनावल्याः' भगवदर्पण-समारोहः** समायोज्यत यत्र परिषन्महासचिवः डा रमाकान्त शुक्लः, पं० चन्द्रभानशर्मा, सपत्नीकः सपरिवारः श्रीगयाप्रसाद बजाजः, डा० हरिदत्त शर्मा, डा० रसराजः, डा० यदुनाथप्रसाददुबे तथा च प्रयागस्थाः संस्कृतकवयो विद्वांसश्च उपातिष्ठन्।

(३) साहित्यवितरणम्

२०–२१.१२.२००३ तारिकायोः दिल्लीसंस्कृतअकादमी-समायोजिते अ०भा० संस्कृत अकादमी सम्मेलने सम्प्राप्तेभ्यो गुजरात हैदराबाद-हिमाचल-उत्तराञ्चल-पुरी-उत्तरप्रदेश-संस्कृतकादमी प्रतिनिधिभ्यः देववाणी-परिषन्महासचिवः डा० रमाकान्त शुक्लः परिषत्प्रकाशितान् ग्रन्थानुपायनी-कृतवान्। **अभिनवः शुक्लः**

संस्कृत-जगद्वार्ता:

दिल्ली संस्कृत अकादमी

नवदिल्ल्यां दिल्ली संस्कृत अकादम्या अग्रे लिखिताः कार्यक्रमाः कोष्ठाङ्कितदिनाङ्केषु अनुष्ठिताः–

१. कालिदासजयन्त्युपलक्ष्ये कालिदाससाहित्यस्य विभिन्नेषु पक्षेषु परिचर्चा (२.११.२००३), २. महाविद्यालयीयश्लोकसंगीतप्रतियोगिता २००३ वर्षीया (६.११.२००३), ३. श्लोकान्त्याक्षरी प्रतियोगिता २००३ वर्षीया (२२.११.२००३), ४. महाविद्यालयीय संस्कृतनाट्यसमारोहः (१०.१२.२००३), ५. वेदमन्त्रान्त्याक्षरीप्रतियोगिता २००३ वर्षीया (१४.१२.२००३), ६. अखिल-भारतीयअकादमीसम्मेलनम् (२०.१२.२००३) ७. अखिलभारतीय-नवोदित-संस्कृतकविप्रतियोगिता २००३-२००४ (२४.१२.२००३), ८. संस्कृत-श्लोकसंगीतप्रशिक्षणकार्यशाला (२५.१२.२००३–२.१.२००४), ९. 'संस्कृत-साहित्ये जीवनमृत्योरवधारणा'-विषयिणी संगोष्ठी (२८.१२.२००३) १०. व्याकरणसूत्रान्त्याक्षरी-प्रतियोगिता २००३-२००४ वर्षीया (१०.१.२००४)

विस्तृतविवरणार्थं संस्कृताकादमी कार्यालयः प्रार्थनीयः तत्सङ्केतस्त्वित्थम्– ५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५ दूरभाषः २३६३५५९२, २३६८१८३५

अकादम्या १९.१.२००४ तारिकायां हिन्दी-भवन-प्रेक्षागारे गणतन्त्र दिवसावसरे अ०भा० संस्कृत कविसम्मेलनमायोज्यते।

डा० कर्णसिंहस्य काव्यपाठः

नवदिल्ल्यां ५.११.२००३ तारिकायां जवाहरलालनेहरूविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रेण तत्रत्यकुलाधिपतेः डा० कर्णसिंहस्य स्वाभिमत

संस्कृतकाव्यपाठः समायोजितः। केन्द्राध्यक्षया डा० शशिप्रभा कुमारमहाभागया स्वागतं व्याहृतम्, कुलपतिना प्रो० गोपालकृष्णचड्ढामहाभागेन आमुखाभिभाषणं कृतं प्रो० कपिलकपूरेण च धन्यवादो ज्ञापितः।

विद्यापीठ-दीक्षान्तसमारोहः

नवदिल्ल्यां ११.११.२००३ तारिकायां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत विद्यापीठस्य सप्तमो दीक्षान्तरसमारोहः सम्मानितोऽभूत्। प्रो० रमारञ्जनमुखर्जी महाभागेन दीक्षान्तभाषणं कृतम्। सारस्वतातिथिना विश्वविद्यालयानुदानायोग सचिवेन प्रो० वेदप्रकाशमहोदयेन पुरस्कारवितरणं कृतम्। विद्यापीठस्य कुलाधिपतिना न्यायमूर्ति श्री पी०एन० भगवतीमहोदयेनाध्यक्ष्यं कृतम्।

अपराह्णे **हिन्दी-संस्कृतकविसम्मेलन**मायोज्यत यत्र विद्यापीठकुलपतिना प्रो० वाचस्पतिउपाध्यायेन कवीनां स्वागतं कृतम्। हिन्दीकविषु श्रीमती मधुमोहिनी उपाध्याय-सरोजिनीप्रीतम-विश्वमोहनतिवारी-ओम्प्रकाशआदित्य-कुँवर बेचैनप्रभृतयः संस्कृतकविषु च डा० भास्कराचार्यत्रिपाठी-रमाकान्त शुक्ल-रमेशकुमार-पाण्डेय-वासुदेवघुशेप्रभृतयः कविताः पेठुः। सञ्चालनं डा० इच्छाराम द्विवेदी 'प्रणवः' कृतवान्।

भर्तृहरि-संगोष्ठी

मोतीलालबनारसीदास-प्रकाशनसंस्थानेन स्वशताब्दीवर्षमालक्ष्य 'इण्डिया इण्टरनेशनल सेण्टर'इत्यत्र १२–१४.१२.२००३ तारिकयोः एका आन्ताराष्ट्रिका संगोष्ठी समायोजिता यत्र चत्वारिंशत्प्रायैर्विद्वद्भिर्भागो गृहीतः।

जयपुरे व्याख्यानमाला अभिनन्दनसमारोहश्च

जयपुरनगरे २२.१२.२००३ तारिकायां राजस्थानविश्वविद्यालयस्य संस्कृत-विभागेन **'पं० बद्रीप्रसादमहर्षिस्मृतिव्याख्यानमालायाः'** किञ्च प्रो० सुभाष वेदालंकारस्याभिनन्दनसमारोहस्यायोजनं कृतम् यत्र मुख्यातिथि-रूपेण सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिः 'अभिराज' राजेन्द्रमिश्रः, सम्मानिताथितिरूपेण गुलाम दस्तगीर 'विराजदारः' अध्यक्षरूपेण च देवर्षि कलानाथशास्त्री आमन्त्रिता आसन्। अस्मिन्नवसरे प्रो० सुभाष तनेजा वेदालंकाराय 'अभिनन्दनग्रन्थः' समर्पितोऽभूत्।

(शेषांशः ११९ तमे पृष्ठे)

श्रीगणेशाय नमः

श्रीजानकीवल्लभो विजयते

श्रीमद्रामचरितमानसम्

(श्रीगोस्वामितुलसीदासरचितरामचरितमानसस्य पं० प्रेमनारायणद्विवेदकृतःसंस्कृतपद्यानुवादः)

प्रथमं सोपानम्

बालकाण्डम्

मङ्गलाचरणम्

आदौ बालेन्दुभालं करिवरवदनं शूर्पकर्णं त्रिनेत्रं
सिन्दूराङ्गं गुणाढ्यं सकलगुणपरं तं गणानामधीशम् ।
मायातीतं समायं भुवननिधिपतिं सर्वदं त्वेकदन्तं
विघ्नेशं विघ्नशान्त्यै हृदयसरसिजे ध्यानगम्यं करोमि ॥१॥

ब्रह्माणीं वेदधात्रीं श्रुतिवचनपरां चन्द्रकोटिप्रकाशां
हंसस्थामुज्ज्वलाङ्गीं सरसिजवदनां चारु मन्दं हसन्तीम् ।
दन्तज्योत्स्नांशुजालैर्निजजनहृदयध्वान्तराशिं हरन्तीं
वन्दे बुद्धिप्रदात्रीं सततमभयदां सच्चिदानन्दरूपाम् ॥२॥

भाले भ्राजत्त्रिपुण्ड्रं शशधरमुकुटं व्यालसूत्रं जटालम्
आशावासो वसानं विषधरवलयं चन्द्रमित्राग्निनेत्रम् ।
ब्रह्माण्डप्रोतशूलं नवजलजतनुं व्यालरुद्राक्षमालं
योगेशं जाह्नवीशं सुरनरमुनिभिः पूजितं नौम्युमेशम् ॥३॥

या दुर्गा दुर्गमाख्या हृदयदुरितहृद्दुर्गमा वेदशास्त्रै-
रारूढा धर्मसिंहे शमदमनिरतैः सद्भिराराध्यते या ।
सा भूयाच्छ्रेयसे नस्त्रिभुवनजननी पालयित्री निहन्त्री
ब्रह्माणी विष्णुशक्तिर्विकटतनुधरा रुद्ररूपा च काली ॥४॥

सर्वं चोद्धृत्य विश्वं घनतिमिरगतं यः प्रकाशे दधाति
दीप्त्या संयोज्य चन्द्रं गगनमुडुगणान् स्वांशुभिर्द्योतते यः ।
यद्भासा पुष्पहासो विहग-कलकलः प्राणिनः कर्मवन्तो
देवोऽसौ बुद्धिजाड्यं हरतु दिनकरो योजयन् सत्पथे माम् ॥५॥
विष्णोर्नाभ्यम्बुजाद् यः प्रभवति मतिमान् यन्मुखेभ्यश्च वेदाः
पौनःपुन्येन सृष्टिं रचयति विविधां जीवकर्मानुरूपाम् ।
जीवानां भालपट्टे लिखति नवलिपिं यश्च भोगाय तेषां
यत्पुत्रा नारदाद्याः सुविमलमतयस्तं विरञ्चिं नमामि ॥६॥
रामं राजीवनेत्रं नवजलदरुचिश्यामलं कोमलाङ्गं
सीतावक्त्राब्जभृङ्गं दशरथतनयं लक्ष्मणेनेड्यमानम् ।
धीरं कोदण्ड-हस्तं दशवदनरिपुं साधुगोविप्रमित्रं
योगिध्येयं हृदब्जे सततसमरसं सर्वगं नौमि नम्रः ॥७॥
चक्रे रामायणं यो नवरसरुचिरं रीतिवक्रोक्तिदिव्या-
लङ्कारव्यञ्जनाद्यैर्मनुजहितपरः स्वात्मतुष्ट्यै मनोज्ञम् ।
बाल्मीकिं तं मुनीन्द्रं कविकुलकमलानां विकासाय भानु-
मार्यादर्शप्रकर्षं सहृदयहृदये भ्राजमानं नमामि ॥८॥
वेदान् शाखासहस्रैरतुलितधिषणोऽवर्धयद् यः सशिष्यो
दिव्यं ज्योतिर्जनानाममृतशुचि महाभारताख्यं हिताय ।
यो वै नानापुराणैर्नरहरिचरितं वर्णयामास भूरि
कृष्णद्वैपायनं तं कविजन-हृदयाह्लादकं नौमि मूर्ध्ना ॥९॥
यः साक्षात्कुरुते समाधिनिरतो सीतान्वितं राघवं
नित्यं यस्य निदेशकः स हनुमान् रुद्रावतारः स्वयम् ।
चक्रे लोकहिताय रामचरितं स्वान्तःसुखायैव यः
पूज्यं तं तुलसीं नमामि हुलसीसूनुं स देयान्मतिम् ॥१०॥
मायाच्छन्नं मनो मे विहरति बहुशो बाह्यतः सर्वदैतत्
त्वत्पादाब्जे कथं स्यादतिशय-चपलं नैव जानाम्युपायम् ।
काव्यं कर्त्तुं न शक्तिः प्रसरति विमलान् त्वद्गुणान् गातुमिच्छा
ध्यात्वा ध्यात्वाहमेवं रघुकुलसुमणे केवलं त्वां प्रपन्नः ॥११॥

शास्त्रपूतं तपःपूतं, मंत्रतंत्रविदां वरम् ।
श्रीगिरिधारिणं वन्दे द्विवेदं प्रपितामहम् ॥१२॥
पुण्यशीलं समं शान्तमन्ते काश्यां तनुत्यजम् ।
श्रीभैरवप्रसादं च प्रणमामि पितामहम् ॥१३॥
यदनुग्रहतो देहो, विद्या ज्ञानं च पावनम् ।
तं नौमि परमानन्दं, पितरं परदैवतम् ॥१४॥
मातरं परमोदारां, रुक्मिणीं भक्तिरूपिणीम् ।
पुनर्नमामि यत्पुण्यैः, श्रीरामचरणे मतिः ॥१५॥
विद्यादानयशःशुभ्रं, सागरे रत्नवत् स्थितम् ।
गोविन्दशास्त्रिणं वन्दे, गुरुं गोविन्दरूपिणम् ॥१६॥
रुद्रावतारमादर्शं, रामेणापि कृतादरम् ।
व्याप्तं सर्वत्र सद्रूपं, वायुसूनुं नमाम्यहम् ॥१७॥
अज्ञानध्वान्तदैत्यौघनाशनं बलिनां बलम् ।
निर्बलानां बलं चैनं, वज्राङ्गं नौमि मारुतिम् ॥१८॥
त्वत्कृपया विरचितवान् यन्नु रामचरितमानसं तुलसी ।
तस्मिन् स्नातुं वाञ्छा स्नापय मां तापनाशाय ॥१९॥
लोकेभ्यः समयच्छद् यदमृतं स लोकभाषायाम् ।
सुरवाणी-सम्पुटितं कीदृङ् मधुरमिति वेत्तुमुत्कण्ठा ॥२०॥
लोको हसतु न हानिर्ममातिलाभः स प्रत्यक्षः ।
रामो भवेद् दयार्द्रो मयि यदि मम जन्म साफल्यम् ॥२१॥
मनस्येवं निधायैव प्रवृत्तः कठिनेऽप्यहम् ।
भवेद् यदि कथा सूक्ता मन्ये मयि हरेः कृपा ॥२२॥
नाहं कर्त्तास्मि कर्त्तासावद्वयः परमेश्वरः ।
सर्वमेतत्कृतं येन दृश्यमानं चराचरम् ॥२३॥
तस्यैवेच्छया नूनं गमिष्यामि निमित्तताम् ।
तदर्थं केवलं जाने स्वार्पणं तस्य पादयोः ॥२४॥
श्रीरामचरणाम्भोजपरागे लुब्धमानसः ।
प्रेमनारायणः सोऽहं भृङ्गवच्छरणं गतः ॥२५॥

तुलसीदासकृतं मङ्गलाचरणम्

वर्णानामर्थसङ्घानां रसानां छन्दसामपि ।
मङ्गलानां च कर्त्तारौ वन्दे वाणी-विनायकौ ॥१॥

भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम् ॥२॥

वन्दे बोधमयं नित्यं गुरुं शङ्ररूपिणम् ।
यमाश्रितो हि वक्रोऽपि चन्द्रः सर्वत्र वन्द्यते ॥३॥

सीतारामगुणग्रामपुण्यारण्य-विहारिणौ ।
वन्दे विशुद्धविज्ञानौ कवीश्वरकपीश्वरौ ॥४॥

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम् ।
सर्वश्रेयस्करीं सीतां नतोऽहं रामवल्लभाम् ॥५॥

यन्मायावशवर्ति विश्वमखिलं ब्रह्मादिदेवासुरा
यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाहेर्भ्रमः ।
यत्पादौ प्लव एक एव हि भवाम्भोधेस्तितीर्षावतां
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥६॥

नानापुराणनिगमागमसंमतं यद्
रामायणे निगदितं क्वचिदन्यतोऽपि ।
स्वान्तःसुखाय तुलसी रघुनाथगाथा-
भाषानिबन्धमतिमञ्जुलमातनोति ॥७॥

करिवररुचिरास्यो नायको यो गणानां
शुभगुणसदनं यो बुद्धिराशिर्विशुद्धः ।
हृदि सपदि यदङ्घ्रिध्यानमात्रेण सिद्धि-
र्वितरतु विबुधाग्र्योऽनुग्रहं स प्रसन्नः ॥१॥

भवन्ति मूका अपि सिद्धवाचो विलङ्घयन्ते किल पङ्गवोऽपि ।
महागिरीन् यत्कृपया स देवो द्रवेद्दयालुः कलिकल्मषघ्नः ॥२॥

नीलसरसिजश्यामस्तरुणारुणरुचिरवारिरुहनयनः ।
करोतु मम हृदि वासं सततं क्षीराब्धिशयनीयः ॥३॥

यो वै स्निह्यति दीने करुणार्णवः स उमारमणः ।
कुन्देदूज्ज्वलदेहो दयतां मयि मदनमर्दनः शम्भुः ॥४॥

नौमि गुरोः पदकञ्जं करुणार्णवस्य हरेर्नृरूपस्य ।
यस्य वचोऽर्कमयूखैर्नष्टः स महामोहतमःपुञ्जः ॥५॥

तत्पदपद्मपरागं सरसं सुरभिं च सानुरागं च ।
अमृतमूलजं चूर्णं वन्दे भवरुङ्निकरशमनम् ॥६॥

मनोमुकुरमलहर्त्रीं गुणवशकर्त्रीं वन्दे पद्धूलिम् ।
मधुमुदमङ्गलदात्रीं विमलविभूतिं च शम्भुतनोः ॥७॥

तत्पदनखमणिदीप्तेः स्मरणाद् भवति दिव्यदृष्टिः सा ।
उदेति कृतिनां भाग्यात् सर्वं च या नाशयति मोहतमः ॥८॥

स्वान्तर्नेत्रे विमले भवरजनीदोषदुःखनाशश्च ।
रामचरितमणिनिकरा विविधा गुप्ताः प्रकाशमायान्ति ॥९॥

दोहा-सिद्धाः सिद्धाञ्जनं दृष्टौ कृत्वा युक्त्या सुसाधकाः ।
भू-वनाद्रिषु सम्पत्तिं स्थितां पश्यन्ति कौतुकात् ॥१०॥ (१)

गुरुपदधूलिजमेतन्मृदु दृग्दोषघ्नमञ्जनं रुचिरम् ।
प्रयोज्य मञ्जुलदृष्टी रामचरितमानसं विदधे ॥११॥.

प्राङ्नौम्यहं भूसुरपादपद्मयुगं महामोहजसंशयघ्नम् ।
गुणाकरांस्तान् सुजनान् ततश्च स्नेहेन सर्वान् प्रणमामि नम्रः ॥१२॥

कार्पासकोशसदृशं हि सतां चरित्रं
यन्नीरसं सुविशदं गुणवत्फलं च ।
छिद्राणि गूहति परस्य विषह्य दुःखं
वन्द्यं यशो जगति शुभ्रतमं तनोति ॥१३॥

सतां समाजोऽखिलमङ्गलाय समुज्ज्वलो जङ्गमतीर्थराजः ।
मन्दाकिनी यत्र च रामभक्तिः सरस्वती ब्रह्मविचारणा च ॥१४॥

विधिनिषेधमयी कलिपापहृद् वहति कर्मकथा रविनन्दिनी ।
हरिगिरीशकथा च सरित्त्रयी जगति मङ्गलमोद-सुखप्रदा ॥१५॥
विश्वास एवात्र वटः स्वधर्मे कृतं सुकर्मैव सतां प्रसङ्गः ।
प्राप्यः स सर्वत्र सदा च सर्वैर्निषेवितः क्लेशशमाय कल्पते ॥१६॥
अलौकिकोऽयं शुभतीर्थराजो ह्यवर्णनीयश्च तथापि लोके ।
उक्तो बुधैर्मज्जुफलप्रदाता दृष्टश्च सद्यः प्रकटप्रभावः ॥१७॥
शृण्वन्ति जानन्ति ततः प्रमोदान् मज्जन्ति तत्रातिशयानुरागात् ।
विन्दन्ति चत्वारि फलानि पुण्यादस्मिन् सुतीर्थे मनुजा इहैव ॥१८॥(२)
निमज्जनेनात्र भवन्ति सद्यः काकाः पिका आशुवकाश्च हंसाः ।
करोतु नाश्चर्यमिहाथ कश्चित् सत्सङ्गतेरेव महत्त्वमेतत् ॥१९॥
बाल्मीक्यगस्त्यावथ नारदाद्याः स्वयं स्वजन्मानि समुक्तवन्तः ।
जलोद्भवा ये स्थलजा नभोजा जीवा जडा अत्र सचेतनाश्च ॥२०॥
कीर्तिर्मतिर्वात्र गतिर्विभूतिर्यथा यदा यत्र च येन लब्धाः ।
विद्धि प्रभावं श्रुतिलोकसिद्धं सत्सङ्गतेरेव न हेतुरन्यः ॥२१॥
ज्ञानं न सत्सङ्गतिमन्तरेण नास्त्येव रामस्य कृपां विना सा ।
सत्सङ्गतिर्मङ्गलमोदमूलं सिद्धिः फलं साधनमस्ति पुण्यम् ॥२२॥
सङ्गाद्विशुद्ध्यन्ति शठाः कुधातवः इव स्वयं स्पर्शमणेः प्रभावतः ।
न ते कुसङ्गेऽपि गुणांस्त्यजन्ति हि सन्तः फणीनां मणयो निजानिव॥२३॥
शिवो विरञ्चिः कवयो रमेशो बुधाश्च वक्तुं प्रभवो न येषाम् ।
तेषां गुणान् शाकवणिङ् मणीनामिवेह सोऽहं नु कथं वदेयम् ॥२४॥
वन्दे तान् समचित्तान् साधून् न कुत्रापि हिताहितौ येषाम् ।
अञ्जलिगतैः प्रसूनैर्द्वावपि हस्तौ सुवासितौ भवतः ॥२५॥(३क)
सन्तः पेशलचित्ताः स्निग्धा लोकहिताय संलग्नाः ।
श्रुतवटुविनया भक्तिं रघुपति-चरणे प्रदास्यन्ति ॥२६॥(३ख)

इति श्रीमद्रामचरितमानसे बालकाण्डे सज्जनवन्दनं नाम
प्रथमः सर्गः समाप्तः ॥

॥ अथ द्वितीयः सर्गः ॥

वन्दे खलाँस्ताञ्शुभभावयुक्तो
हेतुं विना दक्षिणवामतो ये ।
लाभश्च येषां हि परार्थहानौ
शोको निवासेऽतिसुखं विनाशे ॥१॥

हरिगिरीशयशःशशिराहुवदपकृतौ च सहस्त्रभुजा इव ।
प्रतिपलं परदोषनिरीक्षणे नयनपुञ्जसहस्त्रयुता इव ॥२॥

परहितात्मकसर्पिषि यन्मनो भवति संपतनाय हि मक्षिका ।
प्रखरतेजसि ते च कृशानुवत् क्रुधि कृतान्तसहस्त्रसमाश्च ते ॥३॥

अवगुणाघघना धनपा इव परहिताय नवोदितकेतवः ।
अविरतं शयनाय च तत्परा दशमुखानुजवज्जगतीतले ॥४॥

परविनाशकृते स्वतनुत्यजः कृषिविहन्तृहिमोपलकर्कशाः ।
कुपितशेषसमान् प्रणमामि तान् मुखसहस्त्रयुतानघवर्णने ॥५॥

पृथुनिभान् परदोषचयश्रुता-
वयुतकर्णधरान् प्रणमामि तान् ।
पुनरपीह नमामि सुराहिता-
नमरराजसमान् हि निरन्तरम् ॥६॥

पश्यन्ति परदोषांस्ते नयनायुतसंयुताः ।
वचो वज्रं प्रियं येषां वन्दे तानसकृत् खलान् ॥७॥

मया स्वपक्षाद् विनयो व्यधायि न ते चलिष्यन्ति निजस्वभावात् ।
स्नेहेन लोके परिपाल्यमाना निरामिषाः क्वेह भवन्ति काकाः ॥८॥

उदासीनारि-मित्राणां हितं श्रुत्वा ज्वलन्ति ये ।
रीतिं ज्ञात्वाप्यहं प्रीत्या प्राञ्जलिः प्रार्थये मुहुः ॥९॥(४)

सतोऽसतश्चापि नमामि भूयो
दुःखप्रदा ये सममेव दृष्टाः ।
प्राणान् वियोगेन हरन्ति चैके
दुःखाय केचिन्मिलिता भवन्ति ॥१०॥

पद्मं जलौकाश्च भवन्ति सार्धं विभिन्नता तेषु कृता गुणैश्च ।
सुधा शुभाभूदशुभा सुरा च गभीरसिन्धुर्जनको द्वयोर्हि ॥११॥
लोके सन्तो ह्यसन्तश्च यशो वापयशः फलम् ।
स्वभावादेव विन्दन्ति निजकर्मानुसारतः ॥१२॥
गङ्गां सुधांशुं सुजनं सुधां च व्याधं विषं पापनदीं कृशानुम् ।
गुणागुणैस्तानि विदन्ति सर्वे रम्यं हि तद्यस्य रुचिर्हि यत्र ॥१३॥
साधुर्गृह्णाति साधुत्वं नीचो गृह्णाति नीचताम् ।
अमृतत्वे सुधा ख्याता मारणे गरलं तथा ॥१४॥ (५)
सतां गुणानामसतां तथैनसां गाथासमूहः किल धीरवारिधिः ।
केचिन्मयोक्ताः खलु तेषु संग्रहस्त्यागश्च नावेत्य जनेषु दृश्यते॥१५॥
हिताहिता वा रचिता विधात्रा पृथक्कृता दोषगुणैश्च तेषाम् ।
वेदैः पुराणैरितिहासविद्भिः प्रोक्तः प्रपञ्चः खलु मिश्रितोऽयम्॥१६॥
पापं च पुण्यं च सुखं च दुःखं रात्रिर्दिनं साधुरसज्जनश्च ।
जातिः कुजातिश्च सुरासुरौ च श्रेष्ठश्च नीचश्च सुधा विषं च॥१७॥
सुजन्म मृत्युश्च विपच्च सम्पद् ब्रह्माथ माया जगदीशजीवौ ।
राजा दरिद्रो मगधश्च काशी देवापगासावथ कर्मनाशा ॥१८॥
व्याधः सुविप्रो मरुमालवौ च स्वर्गश्च दिव्यो निरयश्च निन्द्यः ।
रागो विरागश्च भवन्ति दोषगुणैर्विभक्तानि बुधैर्जगत्याम् ॥१९॥
अहो चेतनाचेतनं विश्वमेतद् विधेर्निर्मितं भाति दोषैर्गुणैर्वा ।
गुणान्क्षीरमादाय सन्तः सुहंसा विकारं जलं ज्ञानतः संत्यजन्ति ॥२०॥(६)
ददाति धाता यदि सद्विवेकं स्वच्छं मनस्तर्हि गुणानुरक्तम् ।
कालात्स्वभावान्निजकर्मतोऽपि स्खलन्ति मायाविवशा अथापि ॥२१॥
ते दोषदुःखान्यपसार्य तेषां यशो विशुद्धं वितरन्ति सन्तः ।
खलाः सुसङ्गे हितमाचरन्ति न ते स्वभावं मलिनं त्यजन्ति ॥२२॥

वेषप्रभावादपि वञ्चका ये
लोके जनैः पूज्यतमा भवन्ति ।
अन्ते च ते रावणकालनेमि-
राह्वादि-तुल्याः प्रकटीभवन्ति ॥२३॥

कृते कुवेषेऽपि भवन्ति मान्याः सन्तो यथा मारुतिजाम्बवन्तौ ।
सुसङ्गलाभस्य कुसङ्गहानेः ख्यातिः श्रुतौ सर्वजनेषु चैव॥२३॥
ऊर्ध्वं रजो गच्छति वायुसङ्गात् पङ्कत्वमाप्नोति जलप्रसङ्गात् ।
शुभाशुभं वा सदसद् गृहस्थाः कूजन्ति नूनं शुकसारिकाद्याः॥२४॥

धूमः कुसङ्गात् खलु कज्जलं स्या-
ल्लिखन्ति मष्या मुनयः पुराणम् ।
स एव वातानलसंप्रयोगाद्
धाराधरो जीवनदायकः स्यात् ॥२५॥

ग्रहा भेषजं वारि वायुः पटाद्याः
कुयोगं सुयोगं गता वै जगत्याम् ।
हितं वाहितं वापि कुर्वन्ति लोके
बुधाः केवलं तद्धि जानन्ति नान्ये ॥२६॥(७क)

तमः प्रकाशश्च समे तथापि
पक्षद्वयेस्तीह स नामभेदः।
ज्ञात्वा विधोः शोषकपोषकत्वं
ददाति लोकोऽपयशो यशो वा ॥२७॥ (७ख)

ज्ञात्वा राममयान् सर्वान् जडान् वाथ सचेतनान् ।
जीवान् पादाब्जयोर्वन्दे नम्रो बद्धाञ्जलिर्मुहुः ॥२८॥(७ग)

वन्दे देवान् पितॄन् नागान् गंधर्वान् किन्नरान् नरान् ।
खगान् निशाचराँश्चैव कृपां कुरुत सर्वशः ॥२९॥

चतुरशीतिलक्षाणां खजलस्थलचारिणः ।
सीताराममयान् ज्ञात्वा प्राञ्जलिः प्रणतोऽस्म्यहम् ॥३०॥

अवेत्य मां किङ्करमद्य सर्वे
सुनिश्छलाश्चाद्य कृपां कुरुध्वम् ।
बलस्य बुद्धेश्च न मे प्रतीति-
र्युष्मान् प्रपन्नो विनयान्वितोऽहम् ॥३१॥

॥ इति श्रीमद्रामचरितमानसे प्रथमसोपाने द्वितीयः सर्गः ॥

॥ अथ तृतीयः सर्गः ॥

(कविविज्ञवन्दनम्)

श्रीरामचन्द्रान्वयवर्णनेच्छा, स्वल्पा मतिर्मे चरितं गभीरम् ।
एकोऽप्युपायो न हि मे सुलभ्यो राज्ञां स्पृहासौ कृपणं मनश्च ॥१॥

मतिः सुनीचा रुचिरुच्छ्रिता च
वाञ्छा सुधायाः सुलभं न तक्रम् ।
धाष्ट्यं क्षमिष्यन्ति हि सज्जनास्ते
श्रोष्यन्ति मे बालवचोऽनुरागात् ॥२॥

स्खलत्पदं बालवचो निशम्य स्वभावतः स्तः पितरौ प्रसन्नौ ।
क्रूरा हसिष्यन्ति कुबुद्धयो ये वक्राः सदा दूषणभूषिताङ्गाः ॥३॥

कृतं स्वकाव्यं रुचिरं न कस्मै स्यान्नीरसं वा सरसं च तद्वा ।
श्रुत्वा परोक्तिं च मुदान्विता ये नरोत्तमास्ते विरला जगत्याम् ॥४॥

सरित्सरोभिः सदृशा अनेके निजाम्बुवृद्ध्या स्वयमुत्प्लवन्ते ।
वर्धन्त इन्दुं समवेक्ष्य पूर्णमम्भोधितुल्याः सुजनास्तु केचित् ॥५॥

क्षुद्रं तु भाग्यं महती ममाशा विश्वास एको हृदि विद्यते च ।
श्रुत्वा गमिष्यन्ति मुदं सुसन्तः खला हसिष्यन्ति वृथाप्रयासाः ॥६॥(८)

हास्यात्खलानामहितैं न किञ्चित् पिकध्वनिः काकमते कठोरः।
हंसान्वकाश्चातकमेव भेकाः साधोः सुवाणीं च खला हसन्ति ॥७॥

न ये रसज्ञा न च रामभक्ता आनन्ददो हास्यरसश्च तेभ्यः।
भाषाकृतिर्मे सरला मतिश्च हास्ये न दोषः खलु हास्ययोग्या ॥८॥

पादानुरक्तिः सुमतिर्न येषु तेभ्यः कथैषा विरसैव नूनम् ।
कुतर्कहीनाः शिवविष्णुभक्ता ये सन्ति तेभ्यो मधुरा सुरम्या ॥९॥

श्रोष्यन्ति वाणीं रघुनाथभक्तिविभूषितां साधुजनाः प्रशंस्य ।
नाहं कविर्नास्मि वचःप्रवीणो विद्याविहीनोऽस्मि कुतः कला मे॥१०॥

शब्दार्थ-भेदा विविधा हि काव्ये छन्दांसि चालङ्कृतयः प्रबन्धाः ।
भावा रसा दोषगुणा असङ्ख्या भवन्त्यनन्ताश्च विभेदभेदाः॥११॥

कवित्वादिविवेको मे नास्ति सत्यं वदाम्यहम् ।
केवलं रिक्तपत्रेषु लिखामि सरलं प्रभो ॥१२॥
गुणहीना कृतिर्मेऽस्ति विश्वख्यातो गुणः स मे ।
श्रोष्यन्ति च विचार्यैवं सुधियः सुविवेकिनः ॥१३॥(९)

अत्रास्त्युदारं खलु राम नाम
सुपावनं वेदपुराणसारम् ।
अमङ्गलघ्नं जनमङ्गलं यद्
उमासमेतोऽभिजपत्युमेशः ॥१४॥

विना हरेर्नाम न शोभतेऽलङ्कृतिर्विचित्रापि महाकवीनाम् ।
वस्त्रैर्विना चारु विभूषिताङ्गी वराङ्गना चन्द्रमुखीव तन्वी॥१५॥
गुणैर्विहीनां कुकवेश्च वाणीं श्रीरामनाम्नः सुयशोङ्कितां वै ।
गुणग्रहाः षट्पदतुल्यशीला गायन्ति शृण्वन्ति सदैव सन्तः॥१६॥
न विद्यते काव्यरसोऽत्र कांव्ये रामप्रतापः प्रकटस्तथापि ।
विश्वास एवं हृदि वर्धतेऽद्य को गौरवं नैव गतः सुसङ्गात्॥१७॥
हित्वा कटुत्वं ह्यगुरुप्रसङ्गाद् धूमः सुगन्धिर्भवतीति सत्यम् ।
मद्वर्णिता नीरसयापि वाचा कल्याणदा रामकथा जनेभ्यः॥१८॥
गाथा रामस्य रम्या कलिमलमथिनी मङ्गलानां विधात्री
यात्येषा वक्रगत्या सुरसरिदमला पुण्यतोयप्रपूर्णा ।
अत्यन्तं शोभमाना रघुपतियशसा सङ्गता साधुचित्ते
ध्याता या पाति लोकान् हरतनु-विमला पावनी भूतितुल्या॥१९॥
रघुपतियशसा चैषा भणिती रोचिष्यते हि सर्वेभ्यः ।
मलय-गतं खलु काष्ठं सर्वैर्वन्द्यं भवति लोके ॥२०॥(१०क)
सुश्यामधेनोर्विशदं पयो हि पिबन्ति यद्वद् गुणकारि सर्वे ।
हरेर्यशो ग्राम्यगिरा निबद्धं शृण्वन्ति गायन्ति तथैव सन्तः॥२१॥(१०ख)
तथा न मुक्ता-मणयः सरत्ना नगद्विपव्यालशिरःसु भान्ति ।
यथा तरुण्या रमणीयगात्रे हैमे महार्हे मुकुटे च राज्ञाम् ॥२२॥

उत्पद्यतेऽन्यत्र कवेः सुकाव्यं सुशोभतेऽन्यत्र बुधैः प्रयुक्तम् ।
हित्वा विधेर्धाम सरस्वती सा ध्याता समायाति सुभक्तिहेतोः ॥२३॥

रामचरितशुचिनीरे विनावगाहं सरोवरे महति ।
यात्राश्रमो न तस्या देव्या नश्यति सरस्वत्याः ॥२४॥

कवयः कोविदाश्चैवं विचार्य हृदि तत्पराः ।
यशो रामस्य गायन्ति कलिकल्मषनाशनम् ॥२५॥

प्राकृतजनगुणगाने कृते च वाणी सरस्वती सुमतिः ।
स्वशिरो वारं वारं जातानुशया धुनोति कारुण्यात् ॥२६॥

पयोधिं हृदयं प्राहुः सुमतिं शुक्तिमेव च ।
स्वातिविन्दुं तथा वाणीं निगदन्ति विपश्चितः ॥२७॥

विचारसलिलं तत्र यदा वर्षति शीतलम् ।
मणिमौक्तिकतुल्यानां छन्दसामुदयस्तदा ॥२८॥

सुवेध्य युक्त्या लघु गुम्फयित्वा
सन्तस्ततो रामचरित्र-सूत्रे ।
सुनिर्मले वक्षसि धारयित्वा
भक्त्यानुरक्ता नितरां विभान्ति ॥२९॥ (११)

ध्रुवं च ये सन्ति कलौ कराले मरालवेषा अपि काककृत्याः ।
ते छद्मवृत्ताः कलिपापदेहा गच्छन्ति वै वेदपथं विहाय ॥३०॥

भक्ताः प्रसिद्धा अपि वञ्चका ये ये क्रोधकन्दर्पसुवर्णदासाः ।
धर्मध्वजा धार्मिकवृत्तयो ये तदग्रगण्यो जगती तलेऽस्मि ॥३१॥

स्वदुर्गुणांश्चेत् कथयामि सर्वाननन्ततां यास्यति सा कथैव ।
तस्माच्च केचित् कथिता मयात्र ज्ञास्यन्ति चाल्पादपि बुद्धिमन्तः॥३२॥

मत्प्रार्थना शुद्धधियो विचार्य न दूषयिष्यन्ति कथां निशम्य ।
शङ्कां करिष्यन्त्यथ येऽपि बुद्ध्या मत्तो दरिद्रा अंधिका जडास्ते॥३३॥

नाहं कविर्नास्मि विचक्षणो वा गायामि रामस्य गुणान् स्वबुद्ध्या ।
क्व रामवृत्तं तदनन्तपारं प्रपञ्चमग्ना क्व च मे मतिः सा॥३४॥

सुमेरुशैला अपि वायुवेगात् समुड्डयन्ते क्व च तत्र तूलः ।
रामप्रभुत्वं ह्यमितं विचिन्त्य सङ्कोचमायाति मनः कथायाम्॥३५॥

शेषो महेशश्च विधिश्च वाक् च
वेदाः पुराणस्मृतिशास्त्रसङ्घः ।
निषेधवाचा खलु नेति नेति
गायन्ति यस्यैव गुणान् विचित्रान् ॥३६॥(१२)

जानन्ति तेऽनिर्वचनीयरूपं न वाग्विरामश्च तथापि तेषाम् ।
नान्यः सहेतुः खलु कोऽपि तत्र भक्तिप्रभावः श्रुतिभिः स उक्तः॥३७॥

अजो व्यापको विश्वरूपोऽप्यरूपश्चिदानन्दसत्यस्वरूपो य एकः ।
स एव प्रभुर्लीलया विग्रहीव करोत्यत्र लीला अनन्ताः कृपालुः॥३८॥

स केवलो भक्तहितः परेशो देवः कृपालुः प्रणतानुरागी ।
ममत्वकारुण्यमयो जनेषु दयामयो नैव करोति कोपम्॥३९॥

स दीनबन्धुः सरलः समर्थः प्रभुर्गतं वस्तु पुनर्ददाति ।
तद् वर्णयन्तो नृहरेर्यशांसि कुर्वन्ति सन्तोऽर्थवतीं स्ववाणीम् ॥४०॥

स तद्बलोऽहं चरणौ प्रणम्य गायामि रामस्य गुणान् कथासु ।
कीर्तिर्हरेः प्राङ्मुनिभिः सुगीता गच्छामि तेनैव पथा सुखेन॥४१॥

अनन्तपूरासु सरित्सु सेतुं
नृपा अपारास्वपि कारयन्ति ।
आश्रित्य लघ्व्योऽपि पिपीलिकाद्या
विना श्रमं यान्ति तदन्यपारम् ॥४२॥(१३)

कथां हरेः करिष्यामि संवर्धितमनोबलः ।
यद्यशो वर्णितं रम्यं व्यासादिकविपुङ्गवैः ॥४३॥

तेषां पवित्रं चरणाब्जयुग्मं मनोरथावाप्तिपरो नमामि ।
नमामि भूयश्च कलेः कवींस्तान् हरेर्गुणग्रामनिरूपका ये ॥४४॥

यैः प्राकृतैः सत्कविभिर्निबद्धं भाषास्वनेकासु हरेश्चरित्रम् ।
येऽग्रे भविष्यन्ति च सन्ति येऽत्र नमाम्यहं प्रोज्झितकैतवस्तान्॥४५॥

भवन्तु मह्यं च वरप्रदास्ते काव्यं भवेन्मे कविभिः सुमान्यम् ।
विज्ञैर्यदा नाद्रियते प्रबन्धो वृथाश्रमो बालकविः स पृथ्व्याम्॥४६॥

श्रीः सा सुकीर्तिर्भणितिः शुभा सा
गङ्गेव या सर्वहिताय लोके ।
श्रीरामचन्द्रो रमणीयकीर्ती
रूक्षा मदुक्तिस्त्विति मे विचिन्ता ॥४७॥

सुलभं मे च तत्सर्वं भवतां कृपया ध्रुवम् ।
सीव्यन्ते शणपट्टेषु खलु कौशेयतन्तवः ॥४८॥

कीर्त्या विशुद्धं सरलं हि काव्यं
समाद्रियन्ते कवयः सुविज्ञाः ।
विस्मृत्य वैरं सहजं प्रशंसां
कुर्युः सपत्ना अपि यन्निशम्य ॥४९॥(१४क)

काव्यं न बुद्धिं विमलां विना स्यात्
मय्यस्ति तद्धीबलमल्पमेव ।
तस्मात्कृतज्ञे कृपयन्तु येन
हरेर्यशो वर्णनतत्परः स्याम् ॥५०॥(१४ख)

रघुपतिचरितसुमानस-
मञ्जुमराला विपश्चितः कवयः ।
आकर्ण्य बालविनयं
वीक्ष्य रुचिं मयि कृपापरा भवत ॥५१॥(१४ग)

॥श्रीमद्रामचरितमानसे प्रथमसोपाने कवि-विज्ञवन्दनं
नाम तृतीयः सर्गः॥

अथ चतुर्थः सर्गः

वन्दे मुनेःपदाब्जं रचितं रुचिरं रामायणं येन ।
कोमलमथ निर्दोषं सखरं नु सदूषणं चापि ॥ (१४घ)

वन्दे चतुरो वेदान् महतः पोतान् भवाब्धितरणाय ।
न श्राम्यन्ति कदाचिद् ये रघुपतियशोवर्णने विशदे॥१४॥(१४ङ)

वन्दे विधिपदरेणुं रचितो येन तु भवार्णवो विविधः ।
यस्माद् गावः सन्तो विधुः सुधा मधु विषं खलाश्चैव॥२॥(१४च)
नत्वाङ्घ्रिं करबद्धो वच्मि बुधविबुधविप्रग्रहवृन्दम् ।
मनोरथान् मम रुचिरान् पूरयन्तु ते मुदान्विताः शीघ्रम् ॥३॥(१४छ)
मन्दाकिनीं नौमि सरस्वतीं च नद्यावुभे पुण्यचरित्रशीले ।
स्नानेन पानेन च पापहर्त्रीमाद्यां द्वितीयां त्वविवेकहन्त्रीम् ॥४॥
नमामि पूज्यौ पितरावुदारौ गौरीमहेशौ परमौ गुरू च ।
सीतापतेस्तौ सुहृदौ सखायौ नमामि भूयस्तुलसीहितेच्छू ॥५॥
वीतार्थवर्णं कठिनञ्च जातु शिवप्रभावात् प्रकटप्रभावम् ।
गौरीमृडौ शाबरमंत्रजालं जगद्धितार्थं किल सृष्टवन्तौ ॥६॥
साम्बः शिवो मङ्गलदां कथां स
विधास्यतीमां सततानुकूलः ।
स्मृत्वा च तं स्वीकृततत्प्रसादः
करोम्यहं रामचरित्रमेतत् ॥७॥ (१५)
रुचिरा सा मम भणितिः शोभामेष्यति शिवप्रसादेन ।
सतारकेव रात्रिः समुज्ज्वला पूर्णचन्द्रेण ॥८॥
ये वर्णयिष्यन्ति कथां सुपुण्यां श्रोष्यन्ति ये वा हृदि भावयन्तः।
ते मोक्षभाजः कलिदोषहीना हरेर्भविष्यन्ति पदानुरक्ताः ॥९॥
साम्बः स्वप्नेऽपि गौरीशः प्रसन्नो मयि चेद् ध्रुवम् ।
विनिर्मितमिदं काव्यं रमणीयतरं भवेत्॥१०॥(१५)
सुपावनीं तां कलिपापनाशिनीं नमाम्ययोध्यां सरयूं च शोभनाम् ।
नरांश्च नारीश्च पुरीनिवासिनो हरेर्ममत्वं किल येषु हार्दिकम्॥११॥
सीताविनिन्दकस्यापि पापौघं यो व्यनाशयत् ।
कृत्वा विशोकं स्वं धामावासयत्तं नमाम्यहम् ॥१२॥
यत्कीर्तिः प्रथिता लोके विशुभ्रा विमला शुभा ।
प्राचीमिव दिशं वन्दे कौशल्यां राममातरम् ॥१३॥
यत्रासौ राघवेन्दुः खलकमलवनध्वंसनः प्रादुरासीत्
प्राप्तः श्रेष्ठ्यावधिं स स्वयमपि च विधिर्यं च निर्माय विज्ञः।

तं वै कल्याणमूर्तिं दशरथनृपतिं सर्वराज्ञीसमेतम्
वन्दे वाक्कायचित्तैः कृपयतु मयि सोऽपत्यभृत्यं हि जानन्॥१४॥

अयोध्याधिपतिं वन्दे यत्प्रीतिर्हरिपादयोः ।
दीनबन्धुवियोगेन येन प्राणस्तृणीकृताः ॥१५॥

वन्दे परीवारयुतं विदेहं यत्प्रेमरामाङ्घ्रियुगे पवित्रम्।
यद्योगभोगादिषु गुप्तमासीत्तद् वीक्ष्य रामं प्रकटीबभूव ॥१६॥

नमामि पूज्यौ भरतस्य पादौ अवर्णनीयव्रतधारिणोऽहम् ।
भृङ्गायते यस्य मनः पवित्रं श्रीरामपादाब्जरजःसुगन्धे ॥१७॥

वन्दे शुभं लक्ष्मण-पादपद्मं सुशीतलं भक्तसुखप्रदं च ।
श्रीरामकीर्तिध्वजपुण्यदण्डं सुनिर्मलं सद्यशसा विशुभ्रम् ॥१८॥

रिपुसूदनस्य सततं भरतानुगस्य ख्यातशीलस्य ।
चरणसरसिजं भक्त्या वन्दे वीराग्रगण्यस्य ॥१९॥

वन्दे श्रीहनुमन्तं सुवीरवरं तमञ्जनासूनुम् ।
यत्सुयशः श्रीरामः स्वमुखेनावर्णयत् स्नेहात् ॥२०॥

खलजनविनशनवह्निं पवनतनूजं ज्ञाननिधिं वन्दे ।
निवसति यद्धृत्सदने सततं हि धनुर्वाणधरो रामः
॥२१॥(१७)

तं जाम्बवन्तं च विभीषणं च कीशांश्च सुग्रीवमथाङ्गदादीन्।
वन्दे पुनर्यैश्च विनिन्द्यदेहैः प्राप्तः परात्मा रघुवंशनाथः ॥२२॥

मृगा विहङ्गा असुराः सुराश्च ये नराश्च ये रामपदोपसेविनः ।
अहैतुकीभक्तिरता उपासका नमामि तेषां चरणाब्जयुग्मम् ॥२३॥

सनारदं तं सनकं शुकञ्च विज्ञानिनः श्रेष्ठतमान्मुनीन्द्रान् ।
नमामि पृथ्व्यां धृतमस्तकोऽहं जने स्वकीये कृपयन्तु ते च ॥२४॥

विदेहपुत्र्या जगदम्बिकाया अतिप्रियायाः करुणार्णवस्य ।
पदाम्बुजं नौमि पतिव्रतायाः सुनिर्मलां येन मतिं लभेय ॥२५॥

कायेन वाचा मनसाथ बुद्ध्या नमामि रामस्य पदारविन्दम् ।
कञ्जेक्षणस्येषुधनुर्धरस्य भक्तार्तिहर्तुः सुखदायकस्य ॥२६॥

श्रीमद्रामचरितमानसे प्रथमसोपाने देवादिवन्दनं नाम चतुर्थः सर्गः॥

अर्वाचीनसंस्कृतस्य २५ वर्षाणि

अर्वाचीनसंस्कृते १५.१.२००४ यावत्प्रकाशिता सामग्री

(लेखाः, पत्राणि, वार्ता रचनाश्च)

डॉ० चन्द्रमौलिः शुक्लः

आर ६ वाणी विहारः, नयी दिल्ली -११००५९

'देववाणी-परिषद्, दिल्ली' संस्थायाः त्रैमासिकं पत्रम् **'अर्वाचीनसंस्कृतम्'** १९७९ तमेखैष्टेऽब्दे प्रारब्धम्। १.२.१९७९ ई० तारिकायामस्य पञ्जीकरणार्थं- मावेदनपत्रं प्रस्तुतम्। ६.४.१९७९ तारिकायां च एफ-२ (ए/३३९) प्रेस/सी०सी०एस०/७९ संख्यकं घोषणापत्रमनुमतभूत्। अर्वाचीनसंस्कृतस्य प्रवेशाङ्कः ५.६.१९७९ तारिकायां मुद्रितः १५ जुलाई १९७९ तारिकायां च प्रकाशितोऽभूत्। तदनु १५.१०.१९७९ तारिकायां प्रथमवर्षस्य द्वितीयोऽङ्कः प्रकाशितो जातः। इत्थं प्रथमवर्षे केवलमङ्कद्वयमेव प्रकाशितमभूत्। अतः परं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबर-मासानां प्रत्येकं १५ तमे दिनांकेऽस्य प्रकाशनं भवति। कदाचित् कारणविशेषात्पत्रस्य नियततारिकासु प्रकाशनं न भूत्वा विलम्बेनापि भवति। एतादृशानामङ्कानां प्रकाशनतिथेरुल्लेखः पत्रे क्रियते। सप्तमवर्षीयश्चतुर्थोऽङ्कः ३१अक्टूबर १९८५ तारिकायां, अष्टमवर्षीयः प्रथमोऽङ्क ३० जनवरी १९८६ ई० तारिकायाम्, नवमवर्षीयः प्रथमोऽङ्क २६ जनवरी १९८७ ई० तारिकायाम्, द्वादशवर्षीय श्चतुर्थोऽङ्कः ७ जनवरी १९९० ई० तारिकायाम्, चतुर्दशवर्षीयस्तृतीयोऽङ्कः १५ अगस्त १९९२ ई० तारिकायाम्, चतुर्दश-वर्षीय श्चतुर्थोऽङ्कः ७ नवम्बर १९९२ ई० तारिकायाम्, पञ्चदशवर्षीयः प्रथमोऽङ्कः २६.१.१९९३ तारिकायां, पञ्चदशवर्षीयस्तृतीयोऽङ्कः २१.८.१९९२ तारिकायां, षोडशवर्षीयः प्रथमोऽङ्कः २६.१.१९९४ तारिकायां, षोडशवर्षीयतृतीयोऽङ्कः ३१.७.१९९४ तारिकायां, सप्तदशवर्षीयः प्रथमोऽङ्कः १५.२.१९९५ तारिकायां, सप्तदशवर्षीयो द्वितीयोऽङ्कः १५.५.१९९५ तारिकायां, सप्तदशवर्षीयस्तृतीयोऽङ्कः ३१.८.१९९५ तारिकायां, विंशवर्षीयः प्रथमोऽङ्कः २६.१.१९९८ तारिकायाम्, एकविंशवर्षीयस्तृतीयोऽङ्कः

३१.७.१९९९ तारिकायां, द्वाविंशवर्षीयो द्वितीयोऽङ्कः १५.५.२००० तारिकायाम्, द्वाविंशवर्षीयस्तृतीयोऽङ्कः ३१.८.२००० तारिकायाम्, त्रयोविंशवर्षीयो द्वितीयोऽङ्कः ३०.४.२००१ तारिकायाम्, त्रयोविंशवर्षीयस्तृतीयोऽङ्कः १५.८.२००१ तारिकायाम्, चतुर्विंशवर्षीयः प्रथमोऽङ्कः २५.२.२००२ तारिकायाम्, चतुर्विंशवर्षीय- स्तृतीयोऽङ्कः २१.८.२००२ तारिकायाम्, चतुर्विंशवर्षीयश्चतुर्थोऽङ्कः २५.१०.२००२ तारिकायाम्, पंचविंशवर्षीयश्चतुर्थोऽङ्कः २५.१०.२००३ तारिकायाम् च प्रकाशिता जाताः। कदाचित्संयुक्ताङ्का अपि प्रकाश्यन्ते। उदाहरणार्थं सप्तमवर्षीयौ द्वितीयतृतीयावङ्कौ संयुक्तरूपेण १५ अप्रैल १९८५ तारिकायां प्रकाशितावभूताम्। अष्टादशवर्षीयाः प्रथम-द्वितीय-तृतीया अङ्का एकस्मिन् पुटबन्धे संयुक्ताङ्करूपेण २७.५.१९९६ तारिकायां प्रकाशिता जाताः। एकोनविंशे वर्षे द्वितीय-तृतीय-चतुर्था अङ्का एकस्मिन् पुटबन्धे संयुक्ताङ्करूपेण १५.१०.१९९७ तारिकायां प्रकाशिता अभूवन्। विंशे वर्षे द्वितीय-तृतीय-चतुर्था अङ्का संयुक्ताङ्करूपेण १५.१०.१९९८ तारिकायां प्रकाशिता जाताः। एकविंशे वर्षे प्रथम-द्वितीययोरङ्कयोः प्रकाशनं संयुक्तरूपेण १५.४.१९९९ तारिकायां जातम्। शेषे सर्वेऽप्यङ्का यथातिथि प्रकाशिता जाताः। अस्य पञ्जीकरणसंख्या आर. एन. ३४५५४/७९ (R.N. 34554/79) अस्ति। घोषणापत्रमनुरुध्य अंग्रेजी-हिन्दी-संस्कृत-भाषासु रचिता लेखाः संस्कृतभाषानिबद्धा रचनाश्चात्र प्रकाश्यन्ते। प्राधान्यं संस्कृतभाषाया एवास्ति। १५.१.२००४ यावत् ९० पुटबन्धेषु, ९९ अङ्काः प्रकाशिता जाताः येषां ६२५२ पृष्ठेषु विज्ञापनानि तथा च सम्पादकीयान्यतिरिच्य १८६ समीक्षकात्मकाः शोधपराः सूचनापराश्च लेखाः ९६१ संख्याकाश्च संस्कृतरचनाः प्रकाशिताः। रचनासु महाकाव्य-खण्डकाव्य-पुराणकाव्य-गद्यकाव्य-गद्यप्रबन्ध-नाटक-ध्वनिनाटक-अष्टक-शतककाव्य-स्तोत्रकाव्य-दण्डक-गीत-गजल-मुक्तक-कथा-ललितनिबन्ध-अनुवादकाव्य-समस्यापूर्ति-यात्राकाव्य-स्फुटकवितादिविविध-काव्यरूपाणि विद्यन्ते। अर्वाचीनसंस्कृते प्रकाशिता नैका रचनाः स्वतन्त्रग्रन्थरूपेणापि प्रकाशिताः जाताः। अर्वाचीन- संस्कृतस्यावैतनिकः संस्थापकप्रधानसम्पादको डॉ॰ रमाकान्त शुक्लमहाभागोऽस्ति यो हि १९७९ तः पत्रमिदमग्रे नयति।

श्री अभिनवशुक्लः २००२ तः सहसम्पादकत्वेन २००३ तश्चोपसम्पादकत्वेन पत्रमिदं सेवते १९७९ तः १९८४ पर्यन्तं डॉ० रामसुरेशपाण्डेयमहाभागाः पत्रस्य परामर्शदातृमण्डलं सदस्यत्वेन समलंकृतवन्तः। १९७९ तः ९.९. १९९५ पर्यन्तम् आचार्यडॉ०रमेशचन्द्रशुक्लमहाभागाः १९७९ तः २१.५. १९९७ पर्यन्तं च डॉ० कृष्णकान्तशुक्लमहाभागाः पत्रस्य परामर्शदातृमण्डलस्य सदस्यरूपेण स्वसेवाः समर्पितवन्तः। १५.१०.२००२ तः परामर्शदातृमंडले सदस्यत्वेन मनोनीतौ। अस्य पत्रस्य परामर्शदातृमण्डलस्य वर्तमानसदस्याः सन्ति-आचार्यः श्रीनिवास रथः, डॉ० राजेन्द्र मिश्रः, डॉ० उमाकान्त शुक्लः, डॉ० विष्णुकान्त शुक्लः, डा० भास्कराचार्य त्रिपाठी, डा० इच्छाराम द्विवेदी 'प्रणवः', डा० रामसुरेश पाण्डेयः डा० ओमनाथ बिमली च । अस्मिन् पत्रे अर्वाचीनसंस्कृतरचनास्तत्सम्बद्धा लेखाश्च प्रकाश्यन्ते। साम्प्रतिकै-रनेकैलेखकै रचनाकर्तृभिश्चात्र सहयोगः क्रियते। १५.१.२००४ ई० पर्यन्तमर्वाचीनसंस्कृते प्रकाशितानां लेखानां, पत्राणां, वार्तानां, मौलिकरचनानां च कालक्रमानुसारं सूची लेखकनामनिर्देशपुरस्सरम् अत्र प्रस्तूयते। अस्यां सूच्यां भवतां पत्रम्, देववाणीपरिषद्वार्ता, संस्कृतजगद्वार्ता, श्रद्धाञ्जलश्चैति शीर्षकेषु अनेकेषानामङ्कानां सामग्री एकत्रैव दीयते। विस्तरशः पृथग्गणनायां कृतायां त्वियं संख्या वर्धेत।

समीक्षात्मकलेखाः, पत्राणि वार्ताश्च

१. **विंश्यां शताब्द्या रचितानां संस्कृतमहाकाव्यानामितिहास-लेखनस्यावश्यकता** (डॉ० रमाकान्त शुक्लः) १/१, जुलाई, १९७९

२. **'क्षत्रपतिचरित'-मीमांसा** (डॉ० रामसुरेश पाण्डेयः) १/१, जुलाई १९७९

३. **'शिवराज्योदय-समीक्षा'** (डॉ० रमेशचन्द्र शुक्लः) १/१, जुलाई, १९७९

४. **'सीताचरित'-समीक्षणम्** (डॉ० कृष्णकान्त शुक्लः) १/१, जुलाई, १९७९

५. **श्रीस्वामिविवेकानन्दचरितस्य महाकाव्यत्वम्** (डॉ० श्रीमती शशि तिवारी) १/१, जुलाई, १९७९

६. **'दयानन्ददिग्विजय'-वैशिष्ट्यम्** (श्रीमती शशिप्रभाकुमार) १/१, जुलाई, १९७९

७. **श्रीनेहरूपरकसंस्कृतमहाकाव्येषु मानवमूल्यानि** (डॉ० रमेशचन्द्र शुक्लः) १/२, १५ अक्टूबर, १९७९

८. **'जवाहरदिग्विजय' महाकाव्ये नायकपरिकल्पनम्** (डॉ० राजेशकुमार भारद्वाजः) १/२, १५ अक्टूबर, १९७९

९. **कविरत्न ब्रह्मानन्द शुक्ल और उनका 'नेहरूचरित' महाकाव्य** (डॉ० रेवाप्रसाद द्विवेदी) २/१, १५ जनवरी १९८०

१०. **गोस्वामिबलभद्रप्रसादशास्त्रिकृतं 'नेहरूयशःसौरभम्'** (डॉ० रमेशचन्द्र शुक्लः) २/१, १५ जनवरी, १९८०

११. **जवाहरज्योतिर्महाकाव्यस्य समीक्षणम्** (डॉ० रमेशचन्द्र शुक्लः) २/२, १५ अप्रैल, १९८०

१२. **'श्री नेहरूचरित' 'नेहरूयशःसौरभ'-महाकाव्ययोः सूक्तिविधानम्** (डॉ० रमाकान्त शुक्लः) २/२, १५ अप्रैल १९८०

१३. **डॉ० सी०आर० स्वामिनाथ-कृतरचनात्रयस्य समीक्षणम्** (डॉ० रमाकान्त शुक्लः) २/३, १५ जुलाई, १९८०

१४. **भाति मे भारतम्** (**समीक्षा**) (डॉ० रमेशचन्द्र शुक्लः) ३/१, १५ जनवरी, १९८१

१५. **श्रीमदप्पयदीक्षितचरितस्य पूर्वभूमिः** (डॉ० हरिनारायण दीक्षितः) ३/१, १५ जनवरी, १९८१

१६. **'दयानन्दचरित'-समीक्षा** (डॉ० रमेशचन्द्र शुक्लः) ३/२, १५ अप्रैल, १९८१

१७. **'क्रिस्तुभागवत'-समीक्षा** (डॉ० रमेशचन्द्र शुक्लः)३/३, जुलाई, १९८१

१८. **'श्रीकृष्णचरित'-समीक्षा** (डॉ० जयकुमार जैनः) ३/४, १५ अक्टूबर, १९८१

१९. **'जानकीजीवन'-समीक्षा** (डॉ० कौशलचन्द्र मिश्रः) ३/४, १५ अक्टूबर, १९८१

२०. 'श्रीद्वारकाधीशमहाकाव्य'-समीक्षा (डॉ० रमाकान्त शुक्लः) ३/४, १५ अक्टूबर, १९८१

२१. निर्माणाधीनं महाकाव्यं 'श्रीनेहरूचरितम्' (डॉ० रमाकान्त शुक्लः) ३/४, १५ अक्टूबर १९८१

२२. 'सुगमरामायण'-समीक्षा (डॉ० रमाकान्त शुक्लः) ४/१, १५ जनवरी, १९८१

२३. 'सुगमरामायण'-विमर्शः (डॉ० रमेशकुमार लौ) ४/१, १५ जनवरी, १९८१

२४. अर्वाचीनसंस्कृतरचनानामध्ययनाध्यापनयोः प्रासङ्गिकता (डॉ० श्रीमती शशि तिवारी) ४/१, १५ जनवरी, १९८२

२५. शिवराजविजये राष्ट्रियभावना (डॉ० हरिनारायण दीक्षितः) ४/१, १५ जनवरी, १९८२

२६. मुनिश्रीज्ञानसागरकृतिषु समाजो राजनीतिरर्थश्च (डॉ० किरण टण्डनः) ४/२, १५ अप्रैल, १९८२

२७. 'भाति मे भारत' मिति काव्ये राष्ट्रियभावना (डॉ० हरिनारायण दीक्षितः) ४/२, १५ अप्रैल, १९८२

२८. अर्वाचीनसंस्कृतगद्यसमीक्षणम् (डॉ० कैलाशनाथ द्विवेदी) ४/२, १५ अप्रैल, १९८२

२९. कतिपया उल्लेखनीया अर्वाचीनसंस्कृतरचनाः (डॉ० रमाकान्त शुक्लः) ४/२, १५ अप्रैल, १९८२

३०. राधाकृष्णरसायनप्रणेता (डॉ० सी०आर० स्वामिनाथन्) ४/३, १५ जुलाई, १९८२

३१. श्रीओट्टूरउण्णिनम्बूदिरीपादविरचितं 'राधाकृष्णरसायनम्' (डॉ० रमाकान्त शुक्लः) ४/३, १५ जुलाई, १९८२

३२. स्वातन्त्र्योत्तरं संस्कृतकाव्यम् (डॉ० रमेशचन्द्र शुक्लः) ४/३, १५ जुलाई, १९८२

३३. 'सेतुबन्ध' नाटक-समीक्षा (आचार्य लक्ष्मीचन्द्र कौशिकः) ४/३, १५ जुलाई, १९८२

३४. **'भाति मे भारतम्' : काव्यदर्शनम्** (डॉ० शिवदत्त शर्मा चतुर्वेदी) ४/४, १५ अक्टूबर, १९८२

३५. **'एक विश्वास और' इत्येतस्मिन् काव्ये मामकीनो विचारः** (आचार्य रमेशचन्द्र शुक्लः) ५/१, १५ जनवरी, १९८३

३६. **ग्रन्थसमीक्षणम्** (डॉ० रमाकान्त शुक्लः) ५/३, १५ जुलाई, १९८३

३७. **श्रीपादपरागशुद्धिपत्रम्** (सम्पादकः) ५/४, १५ अक्टूबर, १९८३

३८. **श्रीपादसप्ततेः श्रीपादपरागाख्या व्याख्या** (डॉ० सी० आर० स्वामिनाथन्) ५/४, १५ अक्टूबर, १९८३

३९. **पुस्तक-समीक्षा** (सम्पादकः, डॉ० रमाकान्त शुक्लः) ५/४, १५ अक्टूबर, १९८३

४०. **देववाणी-परिषदोऽष्टमसङ्कल्पनादिवसे मुख्यातिथेः श्री पी०के० थुंगनमहाभागस्याभिभाषणम्** (श्री पी० के० थुंगन, उपशिक्षामंत्री, भारतसर्वकारस्य) ५/४, १५ अक्टूबर, १९८३

४१. **पुस्तकपरिचयः** (डॉ० रमाकान्त शुक्लः) ६/१, १५ जनवरी, १९८४

४२. **'जय भारतभूमे'-काव्यस्य मूल्याङ्कनम्** (डॉ० हरिनारायण दीक्षितः) ६/२, १५ अप्रैल, १९८४

४३. **गन्धदूतस्य समीक्षा** (डॉ० रमेशचन्द्र शुक्लः) ६/२, १५, अप्रैल, १९८४

४४. **विंशशताब्दीयसंस्कृतवाङ्मयाय पञ्चाम्बुप्रदेशस्य योगदानम्** (डॉ० शिवप्रसाद भारद्वाजः) ६/२, १५ अप्रैल, १९८४

४५. **विंशशताब्दीयरामकाव्यपरम्परायां 'श्रीरामविलापः'** (डॉ० रमाकान्त शुक्लः) ६/२, १५ अप्रैल, १९८४

४६. **महाकविमुनिश्रीज्ञानसागरस्य संस्कृतकाव्येषु गीतानि** (डॉ० किरण टण्डनः) ६/२, १५ अप्रैल, १९८४

४७. **नवप्रकाशनचर्चा** (डॉ० रमाकान्त शुक्लः) ६/२, १५ अप्रैल, १९८४

४८. **प्रकाशनचर्चा** (डॉ० रमाकान्त शुक्लः) ६/३, १५ जुलाई, १९८४

४९. **प्रकाशनचर्चा** (डॉ० रमाकान्त शुक्लः) ६/४, १५ अक्टूबर, १९८४

५०. **अभिनवप्रकाशनचर्चा** (डॉ० रमाकान्त शुक्लः) ७/१, १५ जनवरी, १९८५

५१. **भारतस्य महामहिमोपराष्ट्रपतिश्रीरामस्वामीवेंकटरामन्-महाभागां सन्देशः** (श्री आर० वेंकटरामन्) ७/२-३, १५ अप्रैल, १९८५

५२. **प्रधानमन्त्रिणः सूचनापरामर्शदातुः श्री एच०वाई० शारदाप्रसाद महाभागस्य सन्देशः** ७/२-३, १५ अप्रैल, १९८५

५३. **सहर्षमभिनन्दम्** (आचार्य विश्वनाथ शास्त्री) ७/२-३, १५ अप्रैल, १९८५

५४. **सन्देशः** (डॉ० जयमन्त मिश्रः) ७/२-३, १५ अप्रैल, १९८५

५५. **राजतां मोदतां तद्विशिष्टं महः** (डॉ० कृष्णकान्त शुक्लः) ९/२-३, १५ अप्रैल, १९८५

५६. **सन्देशः** (श्री स० रामकृष्णन्) ७/२-३, १५ अप्रैल, १९८५

५७. **सन्देशः** (श्री सी०आर० पट्टाभिरामन्) ७/२-३, १५ अप्रैल, १९८५

५८. **सन्देशः** (श्री ईश्वर भाई पटेलः, श्री एन० एम० कंसारा) ७/२-३, १५ अप्रैल, १९८५

५९. **श्रीयुतः शात्तपुर-रामकृष्ण स्वामिनाथः** (श्री अ० कुप्पुस्वाम्यार्यः) ७/२-३, १५ अप्रैल, १९८५

६०. **डॉ० स्वामिनाथः एक दिव्यं जीवनम्** (आचार्य रामदयालु शास्त्री) ७/२-३, १५ अप्रैल, १९८५

६१. **एकोऽपि कर्मभिरनेकः डॉ० स्वामिनाथः** (डॉ० हर्षनाथ मिश्रः) ७/२-३, १५ अप्रैल, १९८५

६२. **डॉ०सी०आर० स्वामिनाथन् : स्वातन्त्र्योत्तर संस्कृत प्रगति के सूत्रधार** (डॉ० मण्डन मिश्रः) ७/२-३, १५ अप्रैल, १९८५

६३. **श्रीपादसप्ततेः डॉ० स्वामिनाथकृता 'श्रीपादपराग' व्याख्या** (आचार्य सोहनलाल शास्त्री) ७/२-३, १५ अप्रैल, १९८५

६४. **डॉ० सी०आर० स्वामिनाथ-प्रणीतस्य 'श्रीबदरीशसुप्रभात' स्तोत्रकाव्यस्य समीक्षा** (आचार्य रमेशचन्द्र शुक्लः) ७/२-३, १५ अप्रैल, १९८५

६५. **भव्यं व्यक्तित्वम्** (आचार्य वि० वेंकटाचलम्) ७/२-३, १५ अप्रैल, १९८५

६६. **Dr. C.R. Swaminathan : A Real Scholar** (Prof. N. H. Ansari) ७/२-३, १५ अप्रैल, १९८५

६७. **शुभाशंसा** (श्री वी० आर० शर्मा) ७/२-३, १५ अप्रैल, १९८५

६८. **अभिनन्दनोक्तिः** (प्रो० एन०एस० रामानुजताताचार्यः) ७/२-३, १५ अप्रैल, १९८५

६९. **क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे** (श्री शास्त्रील विश्वनाथ शर्मा) ७/२-३, अप्रैल, १९८५

७०. **संस्मरणम्** (डॉ० उमारमण झा) ७/२-३, १५ अप्रैल, १९८५

७१. **डॉ० स्वामिनाथन् के प्रति** (श्री त्रिलोकीनाथ धर) ७/२-३, १५ अप्रैल, १९८५

७२. **मूर्तिमयी वेदसंस्कृतभक्तिः** (श्री नटुविल पषेटन्तु नारायणन् नम्पूतिरिः) ७/२-३, १५ अप्रैल, १९८५

७३. **विद्याविनयसम्पन्नाः स्वामिनाथाः** (श्री साम्बदीक्षितः) ७/२-३, १५ अप्रैल, १९८५

७४. **देववाणी-परिषद्वार्तासु स्वामिनाथः** (श्रीमती रमा शुक्ला) ७/२-३, १५ अप्रैल, १९८५

७५. **कविचूडामणेः स्वामिनाथमहोदयस्य कर्णभूषणम्** (श्री भरत पिषारटिः) ७/२-३, १५ अप्रैल, १९८५

७६. **स्वामिनाथरचनापरिचयः** (डॉ० रमाकान्त शुक्लः) ७/२-३, १५ अप्रैल, १९८५

७७. **सहृदयवयस्यः स्वामिनाथः** (डॉ० टी० एन० धर्माधिकारी) ७/२-३, १५ अप्रैल, १९८५

७८. **Message** (V.S. Mani Iyer) ७/२-३, १५ अप्रैल, १९८५

७९. **देववाणी-परिषदः सप्तमेऽष्टमे च संयुक्तवार्षिकाधिवेशने महासचिवेन प्रस्तुतं वार्षिकविवरणम् आयव्ययविवरणम् च** (डॉ० रमाकान्त शुक्लः) ७/४, ३१ अक्टूबर, १९८५

८०. **भवतामभिमतम् (पत्रम्)** (पं० वसन्त गाडगीळः) ७/४, ३१ अक्टूबर, १९८५

८१ **भवतामभिमतम् (पत्रम्)**(वन्दना सेलूकरः) ७/४, ३१ अक्टूबर, १९८५

८२. **पं० रामशरणशास्त्रिकृत-कौमुदीकथाकल्लोलिनी'-समीक्षणम्** (डॉ० चन्द्रभानु त्रिपाठी) ८/४, १५ अक्टूबर, १९८५

८३. **अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः** (श्रीमती शशिप्रभा गोयल) ९/१, २६ जनवरी, १९८६

८४. **'लक्ष्मीशतके' उदाहृतानामाख्यानकानां संग्रहः** (प्रो० वरदाचार्य कण्णन्) ९/१, २६ जनवरी, १९८६

८५. **ज्ञानमूर्तिः श्रीचारुदेवशास्त्री** (डॉ० रमाकान्त शुक्लः) ९/२, १५ अप्रैल, १९८६

८६. **काव्ये 'सब्लाइम' नामधेयम् उदात्तम्** (डॉ० रमाशंकर तिवारी), १०/२, १५ अप्रैल, १९८८

८७. **नवप्रकाशन चर्चा-श्री रेवाभद्रपीठकाव्यम्** (श्री सदाशिवकुमार द्विवेदी) १०/३, १५ जुलाई, १९८८

८८. **श्रीगान्धिचरित-वैशिष्ट्यम्** (डॉ० रमाकान्त शुक्लः), ११/२, १५ अप्रैल, १९८९

८९. **भवतामभिमतम्** (प्रो० परमानन्द शास्त्री) ११/३, १५ जुलाई, १९८९

९०. **भवतामभिमतम्** (श्री कमलापति मिश्रः) ११/३, १५ जुलाई, १९८९

९१. **श्रीगान्धिचरितस्य रचनाशिल्पम्** ((डॉ० सत्यव्रतः शास्त्री) १२/१, १५ जनवरी, १९९०

९२. **'मङ्गल्या'-समीक्षणम्** (आचार्य लक्ष्मीचन्द्र कौशिकः) १२/१, १५ जनवरी, १९९०

९३. **सागरे समायोजिता आधुनिकसंस्कृतसाहित्यसंगोष्ठी** (डॉ० सूर्यप्रकाश व्यासः) १२/१, १५ जनवरी, १९९०

९४. **क्व गच्छानि क्व यानि?** (डॉ० कृष्णनारायण पाण्डेयः) १२/२, १५ अप्रैल, १९९०

९५. **स्वरमंगलायाः श्रीनेहरूविशेषांकः** (नवप्रकाशनचर्चा) (श्री अरविन्दनाभ शुक्लः) १२/२, १५ अप्रैल, १९९०

९६. **काव्योन्मेषः (नवप्रकाशनचर्चा)** (श्री श्री०भि०वेलणकरः) १२/२, १५ अप्रैल, १९९०

९७. **जीवनमुक्तकम् (नवप्रकाशनचर्चा)** (डॉ० रमाकान्त शुक्लः) १२/२, १५ अप्रैल, १९९०

९८. **'भाति मे भारतं' वीक्ष्य** (संकलयित्री- कु० वन्दना मिश्रा) डॉ० करुणापति त्रिपाठी, डॉ० नगेन्द्रः, डॉ० मण्डन मिश्रः, डॉ० रामकरण शर्मा, प्रो० रेवाप्रसाद द्विवेदी, डॉ० देवीदत्त शर्मा, डॉ० मारुतिनन्दन पाठकः, डॉ० रमेश चन्द्र रस्तोगी, श्री हरिमाधवशरणः, श्री एस० बी० वेलणकरः, प्रा० हरिश्चन्द्र रेणापुरकरः, डॉ० प्रकाश पाण्डे, डॉ० पुष्पा दीक्षिता, डॉ० दीपक घोषः, श्री दीनदयाल चतुर्वेदी, डॉ० विशम्भर मिश्रः 'वागीशः', श्री विश्वनाथ शास्त्री, श्री मुकुल शर्मा, डॉ० लक्ष्मीनारायण अग्रवालः, श्री राधेश्याम शर्मा, श्री अनन्तराम गौड़ः, स्निग्धा, अजदक, श्री आर० के० नरूला, श्री चन्द्रभान शर्मा, डा० रवीन्द्र नागरः, याज्ञिकसम्राट् पं० लालनकृष्ण शास्त्री । १२/२, १५ अप्रैल १९९०

९९. **अर्वाचीनसंस्कृते १९९० यावत्प्रकाशिता लेखा रचनाश्च** (डॉ० चन्द्रमौलिः शुक्लः) १३/१, १५ जनवरी, १९९१

१००. **केचित् काव्यानुवादाः** (डॉ० रमाकान्त शुक्लः) १३/१, १५ जनवरी, १९९१

१०१. **हरियाणाकविः श्री लछमनसिंह अग्रवालः 'लक्ष्मणः'** (श्री आनन्दवर्धन शुक्लः) १३/१, १५ जनवरी, १९९१

१०२. **हृदयोद्गारः** (पं० आद्याचरण झा) १३/२, १५ अप्रैल, १९९१

१०३. **अस्ति किञ्चिद्वाचिकम्** ('अभिराज' डॉ० राजेन्द्र मिश्रः) १३/२, १५ अप्रैल, १९९१

१०४. **पत्रम्** (प्रो० रेवाप्रसाद द्विवेदी) १३/२, १५ अप्रैल, १९९१

१०५. **पत्रम्** (डॉ० कैलाशनाथ द्विवेदी) १३/२, १५ अप्रैल, १९९१

१०६. **रससिद्धान्तस्याधिवक्ता डॉ० सुन्दरलाल कथूरिया** (डॉ० रमाकान्त शुक्लः) १३/३, १५ जुलाई, १९९१

१०७. **भवितामभिमतम्** (डॉ० हरिदत्त शर्मा) १३/३, १५ जुलाई, १९९१

१०८. **हनूमत्पञ्चाशत्कर्त्रे शुभाशीर्वादः** (पुष्पगिरिजगद्गुरुशंकराचार्यः) १३/४, १५ अक्टूबर, १९९१

१०९. **हनूमत्पञ्चाशतः Foreword** (न्यायमूर्तिश्रीरंगनाथ मिश्रः) १३/४, १५ अक्टूबर, १९९१

११०. **हनूमत्पञ्चाशतः आमुखम्** (श्री श्री० सुन्दरराजः)

१११. **भवतां पत्रम्** (डॉ० यदुनाथ प्रसाद दुबे) १४/३, १५ अगस्त, १९९२

११२. **का हानिः? समयच्युतिः** (डॉ० रमाकान्त शुक्लः) १४/४, ७ नवम्बर, १९९२

११३. **ग्रन्थ-समीक्षा** (डॉ० ब्रह्ममित्र अवस्थी) १४/४, ७ नवम्बर, १९९२

११४. **श्रीस्वामिनारायणीयं संस्कृतसाहित्यम्** (साधुः भक्तिप्रियदासः) १४/४, ७ नवम्बर, १९९२

११५. **ब्रह्मस्वरूपयोगिजीमहाराजाः** (साभारं संकलितः) १४/४, ७ नवम्बर, १९९२

११६. **प्रमुखस्वामिमहाराजाः** (साभारं संकलितः) १४/४, ७ नवम्बर, १९९२

११७. **धन्यवादार्हा 'अर्वाचीनसंस्कृत'-ग्राहकाः** (सम्पादकः) १४/४, ७ नवम्बर, १९९२

११८. **श्रद्धाञ्जलयः** (डॉ० रमाकान्त शुक्लः) १४/४, ७ नवम्बर, १९९२

११९. **''अर्वाचीनसंस्कृते'' १९९२ई० यावत् प्रकाशिता लेखा रचनाश्च** (डा० चन्द्रमौलिः शुक्लः) १५/२, १५ अप्रैल, १९९३

१२०. **''देववाणी सुवास'स्य अर्वाचीनसंस्कृत-साहित्यपरको भागः** ('अभिराज' डा० राजेन्द्र मिश्रः)१५/२, १५ अप्रैल, १९९३

१२१. **श्रद्धाञ्जलयः** (रमाकान्त शुक्लः) १५/३-२, १ अगस्त १९९३

१२२. **अर्वाचीनसंस्कृतसाहित्य-सर्वेक्षणम् (१९९०-९३)(अ०भा० प्राच्यविद्या-सम्मेलनस्य षट्त्रिंशत्तमेऽधिवेशने साहित्यिकसंस्कृत (Classical Sanskrit) विभागे प्रदत्तमध्यक्षीयं भाषणम्)** (डा० रमाकान्त शुक्लः) १५/३, २१ अगस्त, १९९३

१२३. **डा० एच०ए० शाण्डिल्य-विरचितं कामदूतम्** (डा० केशवप्रसाद गुप्तः) १५/४, १५ अक्टूबर, १९९३

१२४. **श्रद्धाञ्जलिः** (सम्पादकः) १५/४, १५ अक्टूबर १९९३

१२५. **शोकवृत्तम्** (सम्पादकः) १६/२, १५ मई, १९९४

१२६. **पर्यावरणकौमुदी** (समीक्षा) (डा० रमाकान्त शुक्लः) १६/३, १५ जुलाई, १९९४

१२७. **शोकवृत्तम्** (सम्पादकः) १६/३, १५ जुलाई, १९९४

१२८. **शारदाकाराणामनुमतिपत्रम्** (सम्पादकः वसन्त अनन्त गाडगीलः) १६/४, १५ अक्टूबर, १९९४

१२९. **गुजरात संस्कृतसाहित्य-अकादमी-सोमनाथ-रसोत्सव-स्वागतव्याहृतिः** (डा० गौतम पटेलः) १७/२, १५ मई, १९९५

१३०. **अर्वाचीनशिक्षापद्धत्यां नैतिकी शिक्षा** (डा० शशि तिवारी) १७/२, १५ अप्रैल, १९९५

१३१. **'प्रणव' कवेः इच्छारामद्विवेदस्य सत्प्रेरणानाटकस्य समीक्षणम्** (डा० रमाकान्त शुक्लः) १७/२, १५ मई, १९९५

१३२. **नैवेद्यम्** (डा० जनार्दनप्रसाद पाण्डेय 'मणिः' १७/३ ३१ अक्टूबर १९९५

१३३. **विष्णुकाव्यस्य कर्त्ता श्री १०८ पं० सत्यदेवो वासिष्ठः** (डा० रमाकान्त शुक्लः) १८/१-३, २७ मई, १९९६

१३४. **संस्कृते शपथग्रहणार्थं सांसदा वर्धाप्यन्ते !** (सम्पादकः) १८/१-३, २७ मई, १९९६

१३५. **कं वा दयालुं शरणं व्रजेम** (डा० बटोहा झा) १८/४, १५ अक्टूबर, १९९६

१३६. **देववाणी-परिषदो वार्षिकं विवरणम्** (१५.२.१९९३-८.९.१९९६) (डॉ० रमाकान्त शुक्लः) १८/४, १५ अक्टूबर, १९९५

१३७. **शोकवृत्तम्** (सम्पादकः) १८/४, १५ अक्टूबर १९९६

१३८. **आधुनिसंस्कृतकाव्योपलब्धयः** (डॉ० राधावल्लभ त्रिपाठी) १९/१, १५ जनवरी, १९९७

१३९. **दशमविश्वसंस्कृतसम्मेलनावसरे संस्कृतकविसम्मेलनम्** (डॉ० रमाकान्त शुक्लः) १९/१, १५ जनवरी, १९९७

१४०. **दशमविश्वसंस्कृतसम्मेलने व्यवस्था** (डॉ० रमाकान्त शुक्लः) ९१/१, १५ जनवरी १९९७

१४१. **लब्धं भवतीनां पत्रम्** (डॉ० कुमुद कान्हे) १९/१, १५ जनवरी, १९९७

१४२. **कीर्तिशेषेभ्यो दवेवाणी-परिषत्सदस्येभ्यः श्रद्धाञ्जलिः** (डॉ० रमाकान्त शुक्लः) १९/१, १५ जनवरी १९९७

१४३. **पत्रम्** (श्री जगदीशः शास्त्री) २१/१, २६ जनवरी, १९९८

१४४. **सत्याग्रहनीतिकाव्यसमीक्षणम्** (सत्याग्रहनीतिकाव्यस्य चतुर्थसंस्करणस्य सम्पादकीयम्) (डॉ० रमाकान्त शुक्लः) २१/१-२, १५ अप्रैल, १९९९

१४५. **'भाति मे भारते' प्राक्तनकाव्यप्रतिबिम्बनम्** (डॉ० ललित कुमार गौडः) २१/३, ३१ जुलाई, १९९९

१४६. **भवतां पत्रम्** (प्रो० रेवाप्रसाद द्विवेदी, म० अ० लक्ष्मीतातार्याचार्यः, राधावल्लभः) २१/३, ३१ जुलाई, १९९९

१४७. **पटेलमञ्जरी - एकं निरीक्षणम्** (श्री गिरिशः जानी) २१/४, १५ अक्टूबर, १९९९

१४८. **सुधर्मायाः साहित्यसेवा** (डॉ० बा० श्री० रामकृष्णरावः) २१/४, १५ अक्टूबर, १९९९

१४९. **व्योमशेखर की 'अहं राष्ट्री' : शिल्प और संवेदन** (श्रीमती शशि चौहान) २१/४, १५ अक्टूबर, १९९९

१५०. **अर्वाचीनसंस्कृते १९९९ यावत्प्रकाशिता सामग्री (लेखाः, पत्राणि, वार्ता रचनाश्च)** (डा० चन्द्रमौलिशुक्लः) २१/४, १५ अक्टूबर, १९९९

१५१. **अ०भा०संस्कृतपद्यपाठ प्रतियोगिता-सूचना** (डॉ० रमाकान्त शुक्लः) २२/१, १५ जनवरी, २०००

१५२. **किमर्थं संस्कृतवर्षम्** (डॉ० नोदनाथमिश्रः 'यशस्वी') २२/२, १५ मई, २०००

१५३. **देववाणी-परिषद्, दिल्ली २५.३.२००० तारिकायाम् 'अ०भा० संस्कृतपद्यपाठप्रतियोगितामयोजितवती** (डॉ० रमाकान्त शुक्लः) २२/२, १५ मई, २०००

१५४. **उद्घाटन-भाषणम्** (पद्मभूषणडॉ० बिन्देश्वरपाठकः) २२/२, १५ मई, २०००

१५५. **एकादशं विश्वसंस्कृतसम्मेलनम्** (डॉ० कमला भारद्वाजः) २२/२, १५ मई, २०००

१५६. **इटलीदेशे एकादशं विश्वसंस्कृतसम्मेलनम्** (डॉ० शशि तिवारी) २२/२, १५ मई, २०००

१५७. **विश्वशान्त्यै संस्कृतमेव** (प्रो० रमेशकुमार पाण्डेयः) २२/२, १५ मई, २०००

१५८. **आचार्यरामकृपालुद्विवेदिनः संस्कृतसाहित्यम्** (डॉ० कैलाशनाथ द्विवेदी) २२/३, ३१ अगस्त, २०००

१५९. **देववाणी-परिषदो रजतजयन्तीवर्षे आमन्त्रणम्** (डॉ० रमाकान्त शुक्लः) २२/४, १५ अक्टूबर, २०००

१६०. **संस्कृते विज्ञानम् (समीक्षा)** (डॉ० रमाकान्त शुक्लः) २३/२, १५ अप्रैल, २००१

१६१. **अवस्थिनो बच्चूलालस्य प्रतानिनी** (डॉ० धर्मेन्द्रकुमारसिंहदेवः) २३/३, १५ अगस्त, २००१

१६२. **विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारतम्** (डॉ० रमाकान्त शुक्लः) २३/३, १५ अगस्त, २००१

१६३. **डॉ० वर्णेकरमहोदयानां शिवराजनिष्ठसाहित्ये राष्ट्रियविचाराः** (प्रा० सौ० उर्मिला अराणके) २४/१, १५ जनवरी, २००२

१६४. **किं कुर्युः संस्कृतज्ञाः ?** (आचार्य जग औतार शर्मा) २४/१, १५ जनवरी, २००२

१६५. **लघ्वी कथा** (श्री प्रकाशचन्द्र मिश्रः) २४/२, १५ अप्रैल, २००२

१६६. **विज्ञापनस्य भाषा संस्कृतमपि** (डॉ० प्रवेश सक्सेना) २४/३, १५ जुलाई, २००२

१६७. **मासद्वयेन व्याकरणमधीयताम्** (लुब्ना मरियम) २४/३, १५ जुलाई, २००२

१६८. **आयुर्यज्ञेन कल्पताम्** (देवर्षि कलानाथ शास्त्री) २४/३, १५ जुलाई, २००२

१६९. **साकेतसौरभस्य भूमिका** (डॉ० भास्कराचार्य त्रिपाठी) २४/४, १५ अक्टूबर, २००२

१७०. **अर्वाचीनसंस्कृतसाहित्यसर्वेक्षणम्** (डॉ० रमाकान्त शुक्लः) २४/४, १५ अक्टूबर, २००२

१७१. **अर्वाचीनसंस्कृतसाहित्यसंगोष्ठीप्रतिवेदनम्** (डॉ० मञ्जुलता शर्मा) २४/४, १५ अक्टूबर, २००२

१७२. **रामायणेषु मानवाधिकारः** (आचार्य पं० आद्याचरणझा) २५/३, १५ जुलाई, २००३

१७३. **अर्वाचीनसंस्कृतसाहित्ये आध्यात्मिकी चेतना** (डॉ० (श्रीमती) शैल वर्मा) २५/४, १५ अक्टूबर, २००३

१७४. **कुलपतिकुटुम्बशास्त्रिणां पत्रम्** (प्रो० वें० कुटुम्बशास्त्री) २५/४, १५ अक्टूबर, २००३

१७५. **शारदाकाराणामुत्साहः** (डा० रमाकान्त शुक्लः) २५/४, १५ अक्टूबर, २००३

१७६. **राष्ट्रियसंहतिः संस्कृतं च** (श्री० सुन्दरराजः) २६/१, १५ जनवरी, २००४

१७७. **अर्वाचीनसंस्कृतस्य २५ वर्षाणि : अर्वाचीनसंस्कृते १५.१.२००४ यावत्प्रकाशिता सामग्री (लेखाः, पत्राणि, वार्ता रचनाश्च)** (डा० चन्द्रमौलिशुक्लः) २६/१, १५ जनवरी, २००४

१७८. **भवतां पत्रम्** ('अभिराज' डॉ० राजेन्द्र मिश्रः, श्री श्री० सुन्दरराजः, श्रीकान्त 'कुशलः', डॉ० सरिता पाण्डेय, आचार्य मूँगाराम त्रिपाठी) २१/४, १५ अक्टूबर, १९९९ । डॉ० पेन्ना मधुसूदनः, डॉ० बलवीर दत्त शास्त्री, २१/२, ३० अप्रैल, २००१ । डॉ० रेवाप्रसाद द्विवेदी, प्रा० हरिश्चन्द्र रेणापुरकरः २४/१, १५ फरवरी, २००२ । पं० आद्याचरण झा २४/२, १५ अप्रैल, २००२ । डॉ० गौतम वाडीलाल पटेलः, आचार्य प्रभुदत्त शर्मा, डॉ मिथिलेश कुमारी मिश्रा, डॉ० इन्द्रमोहन सिंहः २४/३, २१ अगस्त, २००२ । डॉ० शिवशरण शर्मा द्विवेदी, डॉ० भास्कराचार्य त्रिपाठी, डॉ० शंकरदेव अवतरे, डॉ० श्रीरंजनसूरिदेवः २४/४, २५ अक्टूबर, २००२ । पं० प्रकाशचन्द्रो मिश्रः, डॉ० रूपनारायण पाण्डेयः, डॉ अमियचन्द्र 'सुधेन्दुः', पं० प्रभुदत्त शर्मा, डॉ० शंकरदेव अवतरे २५/४, २५ अक्टूबर, २००३ ।

१७९. **देववाणी-परिषत्समाचाराः** (सम्पादकः) ४/१, १५ जनवरी, १९८२

१८०. **अर्वाचीनसंस्कृतस्य तृतीयवर्षपूर्तिः** (सम्पादकः) ४/१, १५ जनवरी, १९८२

१८१. **देववाणी-परिषद्वार्ता** (डॉ० रमाकान्त शुक्लः) ४/४, १५ अक्टूबर, १९८२, १५/४, १५ अक्टूबर, १९९३; (श्रीमती रमा शुक्ला) ५/१, ११/१, ११/३, १२/२, १३/२, १४/३, १४/४, १५/१, २, ३,

१८/१-३, (डॉ० रवीन्द्र नागरः) ११/२, ११/४, (आनन्दवर्धन शुक्लः) १३/३, १३/४, १४/१, १४/२, १६/१, १६/३, १६/४, १७/३, १९/१, २१/४, २२/१ (डॉ० इच्छाराम द्विवेदी) १२/१, (श्रीमती सरोज व्यासः) २०/१, (अभिनव शुक्लः) १६/३, १८/४, २०/२-४, २१/१-२, २१/३, २२/३, २२/४, २३/२, २३/३, २३/४, २४/१, २४/२, २४/३, २४/४, २५/१, २५/२, २५/३, २५/४, २६/१.

१८२. **संस्कृत-वार्ता** (रमा शुक्ला) ६/३, ६/४, ७/२-३, (डॉ० विन्ध्येश्वरी प्रसाद मिश्रः 'विनयः') ६/४

१८३. **संस्कृत-जगद्वार्ता** (रमा शुक्ला) ६/२, ७/१, ७/४, ८/१, १०/४, ११/२, १२/२, १३/४, १४/२, (डॉ० रामेश्वरदत्त शर्मा) १२/३, (आनन्दवर्धन शुक्लः) १२/४, १३/१, १३/२, १३/३, १४/३, १४/४, १५/१, २, ३, ४, १८/४, (डॉ० रवीन्द्र नागरः) १३/१, (डॉ० पतंजलिकुमार भाटिया) १७/३, (श्रीमती सरोज व्यासः) २०/२-४, २१/१-२, २१/३, (अभिनवः शुक्लः) १७/४, १८/१-३, १९/१, २०/१, २१/४, २२/१, २२/२, २२/३, २२/४, २३/२, २३/३, २३/४, २४/१, २४/२, २४/३, २४/४, २५/१, २५/२, २५/३, २५/४, २६/१ (साधना शर्मा) २०/१-२; (प्रभाकर रामरत्न शास्त्री) २१/१-२; (डॉ० आशा शर्मा) २१/१-२; (डॉ० श्रीमती स्वराज गुप्ता) २१/१-२; (डॉ० चन्द्रभूषण झा) २१/१-२, (राधावल्लभ 'राजीवः') २२/१, (ओंकारसिंह त्यागी) २२/२, (डॉ० इच्छाराम द्विवेदी) २२/३, (डॉ० रमाकान्त शुक्लः) २२/३, (डॉ० अशोक कुमार झा) २३/२, (डॉ० अमियचन्द्र 'सुधेन्दुः') २३/२ (श्रीमती शशिप्रभा गोयल) २३/२, (अपर्णा पाण्डेय) २५/२.

१८४. **श्रद्धाञ्जलयः** : डॉ० रणजीत शास्त्रिणे २२/२, स्व० डॉ० श्यामदेव पाराशराय २३/२, स्व० प्रभाकररामरत्न शास्त्रिणे २३/२; स्व० कृष्णदत्त शर्मणे २३/२, स्व० पं० ओगेटिपरीक्षित् शर्मणे २३/२, स्व० पं० रतिराम शास्त्रिणे २४/१, स्व० डॉ० मण्डन मिश्राय २४/१, स्व० प्रो० रामचन्द्रनारायण दाण्डेकराय २४/१, स्व० डॉ० श्रीधरवासुदेव

सोहोनी-स्व० डॉ० वसन्तकृष्णराव कान्हे-श्रीमती शान्ति अवस्थिभ्यः २४/२, स्व० वि० वेंकटाचलाय २४/३, स्व० डॉ० के०पी०ए० मेननाय २४/४, स्व० वैद्यभीमसेनशास्त्रिणे २४/४, स्व० डॉ० विद्याधरगुलेरिमहाभागाय २५/४,

१८५. **पुस्तकपरिचयः/नवप्रकाशनचर्चा** : दक्षिणावर्तविलासम् (अभिनवः शुक्लः) २४/१ गीतानन्तरसम् (रमाकान्त शुक्लः) २५/४

१८६. **संदेशः** (श्री महाराज कृष्ण कावः) २२/२, १५ मई, २०००

मौलिकरचनाः

अस्यां सूच्यां प्रायः कविता एव सन्ति। अन्यथाभावे कोष्ठकेषु साहित्यविधायाः संकेतः क्रियते :–

१. **सप्तपदी** (पं० क० न० वरदराज अयंगारः) २/२, १५ अप्रैल, १९८०

२. **भूतले भाति मेऽनारतं भारतम्** (संक्षेपः) (डॉ० रमाकान्त शुक्लः) २/२, १५ अप्रैल, १९८०

३. **देववाणी-वसन्तः** (पं० बटुकनाथ शास्त्री खिस्ते) २/२, १५ अप्रैल, १९८०

४. **भारतवन्दनम्** (डॉ० वासुदेवकृष्ण चतुर्वेदः) २/२, १५ अप्रैल, १९८०

५. **राजधान्याः सुषमावर्णनम्** (डॉ० जगदीशदत्त दीक्षितः) २/२, १५ अप्रैल, १९८०

६. **महामाये !** (डॉ० राजेन्द्र मिश्रः) २/२, १५ अप्रैल, १९८०

७. **अहम् नेता** (पण्डितविष्णुकान्तशुक्लः) २/२, १५ अप्रैल, १९८०

८. **ते के न जानीमहे !** (डॉ० कृष्णकान्त शुक्लः) २/२, १५ अप्रैल, १९८०

९. **दुराशा** (डॉ० शिवप्रसाद भारद्वाजः) २/२, १५ अप्रैल, १९८०

१०. **अयि केसरिन् !** (डॉ० सुधाकराचार्य त्रिपाठी) २/२, १५ अप्रैल, १९८०

११. शिक्षा च का यत्र न संस्कृतं स्यात्? (वैद्य रामस्वरूप शास्त्री) २/२, १५ अप्रैल, १९८०

१२. आचाररूपकम् (पं० रघुनाथप्रसादचतुर्वेदः) २/२, १५ अप्रैल, १९८०

१३. रसिकता सिकता कणिका कुतः (आचार्य आनन्द झा) २/२, १५ अप्रैल, १९८०

१४. गीर्वाणवाणीस्तवः (श्री विशुद्धानन्दशास्त्री) २/२, १५ अप्रैल, १९८०

१५. कर्णभूषणम् (नाटकम्) (डॉ० सी०आर० स्वामिनाथन्) २/३, १५ जुलाई, १९८०

१६. ध्वस्तं कुसुमम् (डॉ० सी० आर० स्वामिनाथन्) २/३, १५ जुलाई, १९८०

१७. नरबलिप्रबन्धः (डॉ० सी० आर० स्वामिनाथन्) २/३, १५ जुलाई, १९८०

१८. 'भूतले भाति मेऽनारतं भारतम्' (काव्यम्)(डॉ० रमाक़ान्त शुक्लः) २/४, १५ अक्टूबर, १९८०

१९. श्रीमदप्पयदीक्षितचरितम् (गद्यकाव्यं) (डॉ० हरिनारायण दीक्षितः) ३/१, १५ जनवरी, १९८१

२०. सदाशयसमुच्चयः (पं० टी०वी० परमेश्वर अय्यरः) ३/२, १५ अप्रैल, १९८१

२१. आभाणकमञ्जरी (पं० टी० वी० परमेश्वर अय्यरः) ३/३, १५ जुलाई, १९८१

२२. सुरभारती विजयते (डॉ० रमाकान्त शुक्लः) ३/३, १५ जुलाई, १९८१

२३. संस्कृतवागष्टकम् (डॉ० उमाकान्त शुक्लः) ३/४, १५ अक्टूबर, १९८१

२४. **अन्योक्तिस्तबकम्** (कविरत्नश्रीकृष्णसेमवालः) ४/२, १५ अप्रैल, १९८२

२५. **जीवनं सारभूतम्** (डॉ० कृष्णकान्त शुक्लः) ४/२, १५ अप्रैल, १९८२

२६. **संवेदनं निवेदनं च** (श्री मथुरादत्त जोशी) ४/२, १५ अप्रैल, १९८२

२७. **अन्धकारः** (श्री हर्षदेव 'माधवः') ४/२, १५ अप्रैल, १९८२

२८. **भारते भासतां भारती संस्कृतिः** (डॉ० वनेश्वर पाठकः) ४/३, १५ जुलाई, १९८२

२९. **अभिनवहनुमन्नाटकम्** (नवाङ्केषु नाटकम्) (डॉ० रमेशचन्द्र शुक्लः) ४/४, १५ अक्टूबर, १९८२

३०. **भाति मे भारती भारतेऽनारतम्** (आचार्य वेदानन्द झा)४/४, १५ अक्टूबर, १९८२

३१. **व्यवधानम्** (अध्यापकः केशवचन्द्र दाशः) ४/४, १५ अक्टूबर, १९८२

पं० टी०वी० परमेश्वर अय्यर-प्रणीतानि स्तबकाष्टके वर्गीकृतानि चतुस्त्रिंशदष्टकानि (साहित्यकौतुकम्)

३२. **श्रीरुद्राष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३३. **श्रीकृष्णाष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३४. **श्रीमद्भारताष्टकम्** (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३५. **राष्ट्रनेत्रष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३६. **सैनिकाष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३७. **विद्वदष्टकम्** (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३८. **भिक्षुकाष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

३९. **द्रविणाष्टकम्** (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

४०. **वस्त्राष्टकम्** (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

४१. भोजनाष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४२. वेश्माष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४३. खिस्तुदेवाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४४. श्रीकालिदासाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४५. श्रीरामाष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४६. श्रीगान्ध्यष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४७. श्रीदयानन्दाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४८. श्रीविनोबाष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
४९. चलचित्राष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५०. पत्रिकाष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५१. निद्राष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५२. प्रेमाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५३. योषाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५४. पादपाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५५. ग्रामाष्टकम् (पं० टी० वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५६. पुर्यष्टकम् (पं० टी० वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५७. सिंहाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५८. हंसाष्टकम् (पं० टी० वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
५९. गर्दभाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
६०. करीन्द्राष्टकम् (पं०टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
६१. काकाष्टकम् (पं० टी०वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३
६२. दानाष्टकम् (पं० टी० वी० परमेश्वर अय्यरः) ५/१ जनवरी १९८३

६३. **धर्माष्टकम्** (पं॰ टी॰ वी॰ परमेश्वर अय्यरः) ५/१ जनवरी १९८३

६४. **भक्त्यष्टकम्** (पं॰ टी॰वी॰ परमेश्वर अय्यरः) ५/१ जनवरी १९८३

६५. **मोक्षाष्टकम्**, पं॰ टी॰ वी॰ परमेश्वर अय्यरः) ५/१ जनवरी १९८३

स्फूर्तिसप्तशती (आर्याभागः) (अत्र ५४ शीर्षकेषु ६१९ पद्यानि संकलितानि। अष्टमं शीर्षकं विहाय सर्वत्र आर्याच्छन्दः प्रयुक्तम्। शीर्षकनामानि यथा-

६६. **राधा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

६७. **कृष्णद्वैपायनः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

६८. **मङ्गलम्** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

६९. **प्रतिभा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७०. **उपनिषत्** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७१. **गीता** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७२. **लोकमान्यतिलकः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७३. **महात्मा गान्धी** (डा॰शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७४. **श्रद्धा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७५. **स्मृतिलीला** (डा॰ शिवदत्तशर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७६. **संस्कृतभाषा चिरं जयति** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७७. **सहृदयसम्बुद्धिः** (डा॰शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७८. **सहयोगः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

७९. **कथा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

८०. **दृश्यावलिः** (डा॰ शिवदत्तशर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

८१. **औदार्यम्** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

८२. **एकान्ताः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

८३. **मेघमाला** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३

८४. **मेघाः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
८५. **वेदना** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
८६. **सिद्धस्थानम्** (डा॰ शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३
८७. **स्वरलहरी** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
८८. **सा काऽपि** (डा॰ शिवदत्तशर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
८९. **दूरे अन्तिके** (डा॰ शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९०. **ऊर्जा विद्युत्** (डा॰ शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९१. **रतिः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९२. **जीवनम्** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९३. **संघर्षः** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९४. **.आह्वानम्** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९५. **भाषा विवशा** (डा॰शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९६. **विवशता** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९७. **प्रेरणा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९८. **वैज्ञानिकधारा** (डा॰ शिवदत्तशर्माचतुर्वेदी) ५/२, १५ अप्रैल, १९८३
९९. **कुण्ठा** (डा॰ शिवदत्त शर्मा चतुर्वेदी) ५/२, १५ अप्रैल, १९८३
